Shri Raghunatha Temple MSS. Library,
JAMMU

No. ३४६ / घ

Title काव्यालङ्कारसूत्रवृत्तिः

Author वामनाचार्यः

Extent २८ पत्र Age सं. १८४९

Subject अलङ्कारशास्त्र

काव्यालंकारसूत्रवृत्तिः

२५६

२९ पन्ने

नं. ३२६६
[illegible]
२६ पत्राणि
[illegible]
[illegible]
[illegible]
लिपिसं. [illegible]

८६

काव्य
११४.

श्रीकृष्णायनमः प्रणम्यपरमंज्योतिर्वामनेनकविप्रिया· काव्यालङ्कारसूत्राणांस्वेषांवृत्तिर्विधीयते १ काव्यंग्राह्यमलङ्का
रात् १ काव्यंखलुग्राह्यमुपादेयंभवत्यलङ्कारात्। काव्यशब्दोयंगुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्त्तते भक्त्यातुशब्दार्थमा
त्रवचनोत्रगृह्यते १ कोसावलङ्कारइत्याहसौन्दर्यमलङ्कारः २ अलङ्कृतिरलङ्कारः। करणव्युत्पत्त्यापुनरलङ्कारशब्दोयमुपमाना
दिषुवर्त्तते २॥ सदोषगुणालङ्कारहानादानाभ्याम् सखल्वयमलङ्कारोदोषहानाद्गुणालङ्कारादानाच्चसम्पाद्यःकवेः ३ शास्त्रत
स्ते ४ तेचैतेदोषगुणालङ्कारहानादानेशास्त्रतोवगन्तव्यो। ततोहिज्ञात्वादोषान्जह्याद्गुणानाददीत ४ किंपुनः फलमलङ्का
रवताकाव्येनयेनैतदर्थोयंयत्नइत्याह· काव्यंसद्दृष्टादृष्टार्थंप्रीतिकीर्त्तिहेतुत्वात् ५ काव्यंसच्चारुदृष्टप्रयोजनंप्रीतिहेतुत्वा
त्। अदृष्टप्रयोजनंकीर्त्तिहेतुत्वात्· अत्रश्लोकाः। प्रतिष्ठांकाव्यबन्धस्ययशसःसरणिंविदुः। अकीर्त्तिवर्त्तनींत्वेतांकुकवित्ववि
डम्बिनीम्॥ कीर्त्तिंस्वर्गफलामाहुरासंसारंविपश्चितः। अकीर्त्तिंचनिरालोकनरकोद्देशदूतिकाम्। तस्मात्कीर्त्तिमुपादातुम
कीर्त्तिंचव्यपोहितुम्· काव्यालङ्कारसूत्रार्थःप्रसाद्यःकविपुङ्गवैः॥ ॥ काव्यालङ्कारसूत्रवृत्तौशारीरेप्रथमेऽधिकरणेप्रथमोध्या
यः १ प्रयोजनस्थापना॥ अधिकारिनिरूपणार्थमाह· अरोचकिनःसतृणाभ्यवहारिणश्च कवयः १ इहखलुद्विधाः कवयःसम्भ
वन्ति· अरोचकिनःसतृणाभ्यवहारिणश्चेति· अरोचकिसतृणाभ्यवहारिशब्दौगौणार्थौ॥ कोऽसावर्थः। विवेकित्वमविवेकि

तज्ज्ञेति ६ यदाह· पूर्वे शिष्या विवेकित्वात्॥ ७ पूर्वे खल्वरोचकिनः शिष्याः शासनीया विवेकित्वात् विवेचनशीलत्वात् ७ नेतरे त
द्विपर्ययात् ८ इतरे सतृणाभ्यवहारिणो न शिष्याः तद्विपर्ययात्· अविवेचनशीलत्वात्। न च शीलमपाकर्तुं शक्यं ८ नन्वेवं शास्त्रं
तु सर्वार्थग्राहि न स्यात् को वा मन्यते तदाह· न शास्त्रमद्रव्येष्वर्थवत् ९ न खलु शास्त्रमद्रव्येषु अविवेकिष्वर्थवत् ९॥ निदर्शना
र्थमाह· न कतकं पङ्कप्रसादाय १० न कतकं पयसः पङ्कप्रसादाय भवतीति १० अधिकारिणो निरूप्य रीतिविनिश्चयार्थमाह·
रीतिरात्मा काव्यस्य ११ रीतिर्नामेयमात्मा काव्यस्य शरीरस्येवेति वाक्यशेषः ११ [redacted] का पुनरियं रीतिरित्याह· विशिष्टपदरचना रीतिः
१२ विशेषवती पदानां रचना रीतिः १२ कोऽसौ विशेषः विशेषो गुणात्मा [redacted] १३ व[redacted]मानगुणरूपो विशेषः १३ सा त्रिधा वैदर्भी गौडीया पाञ्चाली चेति १४ किं पु
विशेषे नर्देश[redacted] द्रव्यवद्गुणोत्पत्तिः काव्यानां येनायं देशविशेषव्यपदेशः। नैवं यदाह विदर्भादिषु दृष्टत्वात्तत्समाख्या, वैदर्भगौडपञ्चालेषु देशेषु त
त्रत्यैः कविभिर्यथास्वरूपमुपलब्धत्वाद्देशसमाख्याः न पुनर्देशैः किञ्चिदुपक्रियते १५ तासां गुणभेदाद्भेदमाह· समग्र[redacted]
[redacted] ग्रगुणा वैदर्भी॰ १६ समग्रैरोजः प्रसादप्रभृतिभिर्गुणैरुपेता वैदर्भी
नाम अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता· विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते॥ [redacted] मेवं कवयः स्तुवन्ति· सति वक्त्रे
अत्र ओजो रि सत्यर्थे सति शब्दानुशासने· अस्ति तन्न विना येन परिस्रवति वाङ्मधु· उदाहरणम्॰ गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ता

वैदर्भी गौडीयां पाञ्चाली च सा चेयं रीतिस्त्रिधाभिप्रेते· गौडी वैदर्भी पाञ्चाली

२ तं घ्ना या या व ड्डुक द म्बकं म्न ग कुलं रो म स्थ्य म म्प स्पतुः विश श्वे: क्षिपतां व रा ह पत्र भिर्मुस्ता [illegible] तिः पल्व ले वि श्रामं ल भन्ता मिर्द्च दिधि ल न्या वं [illegible] म स्मृ रतु:
१६ औजः कान्तिमती गौडीया १७ ई ओजः कान्तिश्च यस्यास्ता: सेयमोजः कान्तिमती गौडीया नामरीतिः। माधुर्यसौकुमार्ययोरभावात् समासबहु [illegible] त्यन्तो
अलङ्कारश्लोकः त्वणपदा च समस्तात्युद्भटपदा मोजः कान्तिगुणाड्कितां गौडीयामपि गायन्ति रीतिं रीतिविचक्षणाः यथा दोर्दण्डाञ्चितचन्द्रशे [illegible] रधनुर्दण्डाव
रा भङ्गोद्धृतष्टङ्कारध्वनिर्यंबालचरितप्रस्तावनाडिण्डिमः द्राक्पर्यस्तकपाल सम्पुटमिलद्ब्रह्माण्डभाण्डोदरभ्रा [illegible] १८ माधुर्येण सौकुमार्येण गु
णेनोपपन्ना पाञ्चाली नामरीतिः। ओजः कान्त्योरभावात् अल्पाविच्छाया च श्लिष्टश्लथभावां तु पुराणच्छायमाश्रिताम् मधुरां सुकुमारां
चपाञ्चालीकवयो विदुः यथा ग्रामेऽस्मिन्पथिकाय पान्थवसतिर्नैवाधुना दीयते रात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवा तेनो [illegible] य
खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतं येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति॥ एतासु तिसृषु रीतिषु रेखा स्विव चित्रं काव्यं प्रति
र ष्ठितमिति १८ तासां पूर्वा ग्राह्या गुणसाकल्यात् तासां तिसृणां रीतीनां पूर्वा वैदर्भी ग्राह्या गुणसाकल्यात् न पुनरितरे स्तोकगुणत्वात् १९
तदारोहणार्थमितराभ्यास इत्येके २० वैदर्भ्या एवारोहणार्थमितरयो रीत्योरभ्यास इत्येके मन्यन्ते न अतत्त्वशीलस्य तत्त्वा निष्पत्तेः
२१ न ह्यतत्त्वं शीलयतस्तत्त्वं निष्पद्यते २१ दृष्टान्तमाह न शणसूत्रवानाभ्यासे त्रसरतन्तुवानवैचित्र्यलाभः २२ नहि शणसूत्रवा [illegible] भ न
भ्यासे तन्तुविन्दस्त्रसरतन्तुवानवैचित्र्यं लभते २२ तस्या मर्थगुणसम्पदास्वाद्या २३ तस्या वैदर्भ्या मर्थगुणसम्पदास्वाद्या भवति २३ तदुपा राम २
एष रोहा [illegible] २४ तदुपाधानतः खल्वर्थगुणलेशोपि स्वदते किमङ्ग पुनरर्थसम्पदिति तथाचाहुः किन्त्वस्ति काचिदपराऽपि पदानुपूर्वी यस्यां न किंचि
दर्थगुणलेशोपि
गुण साऽपि समासैर्भावेषु द्वैवेदर्भी रीतिः॥ शुद्ववैदर्भीतिमन्यते यदि समस्तं पदं न भवति

पी १ गम्य चि यथात्वं

आनंदयत्यथचकर्ण पथप्रयातास्वेतः सतामम तरच्छि रिवमविष्टा॥१॥

दपि किंचिदिवावभातीति॥ वचसि यमधिशय्य स्पन्दते वाचकश्रीर्वितथमपि तथ्यालंघ्यत्व वस्तु प्रयाति उदयति हि सताद्दक्कापि वैदर्भ रीतौ सहृदययत्नद
यानां रञ्जकः कोपि पाकः॥ २४ सायं वैदर्भीतां स्यात् २५ सापीयमथ गुरा सम्पद्वैदर्भीत्युच्यते ता स्याद्दित्युपचारतो व्यवहारं दर्शयति २५॥
कात्यालङ्कारसूत्रे शारीरे प्रथमेऽधिकरणे द्वितीयोऽध्यायः २॥ अधिकारिचिन्तारीतिविनिश्चयश्च॥ रीतिं निरूप्य काव्याङ्गानि दर्शयितुमाह·
लोको विद्याः प्रकीर्णं कञ्च काव्याङ्गानि २६ उद्देशक्रमेणैव व्याचष्टे लोकवृत्तं लोकः २७ लोकः स्थावरजं [redacted] मात्मा तस्य वर्तनं वृत्तमिति २७ शब्द
स्मृत्यभिधानकोषच्छन्दोविचितिकलाकामशास्त्रदण्डनीतिपूर्वीविद्याः २८ शब्दस्मृत्यादीनां पूर्वं पूर्वं काव्ये उपकरणीयत्वात् २८ ता तत्पूर्वकृतं
सां काव्याङ्गत्वं योजयितुमाह· शब्दस्मृतेः शब्दशुद्धिः २९ शब्दस्मृतेर्व्याकरणात् शब्दानां शुद्धिः साधुत्वनिश्चयः। शुद्धानि हि पदानि निःशङ्कं पेः
कविभिः प्रयुज्यन्त इति। २९ अभिधानकोशात्पदार्थनिश्चयः ३० पदं हि रचनाप्रवेशयोग्यं भावयन्न संदिग्धार्थत्वेन गृह्णीयान्न वर्जयेदिति काव्यबंधविग्रः॥
[redacted] न स्मादभिधानकोशतएवार्थनिश्चयः तमिति। अपूर्वाभिधानलाभार्थत्वं अभिधानकोशस्यायुक्तमप्रयुक्तस्याप्रयोज्यत्वात्· र्थ
यदि तर्हि प्रयुज्यते· किमिति पदस्य सन्दिग्धार्थत्वमाशङ्कितम्· तन्न सामान्ये नाप्यर्थावगतिः संभवतीति। यथा नीवीशब्देन जघनवस्त्र
ग्रन्थिरुच्यत इति कस्यचिन्निश्चयः स्त्रियाः पुरुषस्य वेति [redacted] ति संशयः॥ नीवी तु नीवी वंधः श्लथीकृत इति योगः [redacted] रूपचाराद्वा ३० भ्रांते
छन्दोविचितेर्वृत्तसंशयच्छेदः ३१ काव्याभ्यासाद्वृत्तसंक्रान्तिर्भवत्येव। किन्तु मात्रावृत्तादिषु क्वचित्संशयः स्यात् अतो वृत्तसंशयच्छेदश्छन्दः
शास्त्रतो विधेय इति ३१ कलाशास्त्रेभ्यः कला [redacted] स्य संवित् ३२ कलान्नृत्यगीतवृत्तादिकास्तासामभिधायकानि शास्त्राणि विशाखिला
तत्र
दि
[redacted] तनं नार्या जघनस्य स्यवासस इति नाममालाप्रतीकमपश्यतः। अ

२ दिप्रणीतानि कलाशास्त्राणि तेभ्यः कलातत्त्वस्य संवित्संवेदनम्। नहि कलातत्त्वानुपलब्धौ कलावस्तु सम्यङ्निबद्धुं शक्यमिति। ३२ कामशास्त्रत
:कामोपचारस्य ३३ संविदित्यनुवर्तते। कामोपचारस्य संवित्कामशास्त्रत इति। कामोपचारबहुलं हि वस्तु काव्यस्येति। ३३ दण्डनीतेर्नयानययोः
३४ दण्डनीतिमनुशास्त्रान्नयस्यानयस्य च संविदिति। तत्र षाड्गुण्यस्य यथावत्प्रयोगो नयः। विपरीतोऽनयः। न हि तावविज्ञाय शक्यो नायकप्रतिनाय
कयोर्वृत्तं निबद्धुमिति ३४ इतिवृत्तकुटिलत्वं च ततः ३५ कुत्पत्तिमूलत्वात्तस्य। एवमन्यासामपि विद्यानां यथायथं प्रयोगो वर्णनीय इति ३५ लक्ष्यज्ञ
त्वमभियोगो वृद्धसेवावेक्षणं प्रतिभानमवधानं च प्रकीर्णकम् ३६ तत्र काव्यपरिचयो लक्ष्यज्ञत्वम्: ३७ ततो हि काव्यबन्धव्युत्पत्तिर्भवति। काव्यबन्धोद्यमो
ऽभियोगः ३८ काव्यस्य बन्धनं काव्यबन्धस्तत्रोद्यमोऽभियोगः स कवित्वप्रकर्षमचिरेण पयति ३९ काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा ३९ काव्योप
देशगुरवस्ते काव्योपदेशगुरवस्तेषामुपासनं वृद्धसेवा। ततः काव्यच्छायासंक्रान्तिर्भवति ३९ पदाधानोद्धरणे चावेक्षणम्: ४० पदस्याधानं न्यासः
उद्धरणमपसरणम्। तयोः खल्ववेक्षणम्। अत्र श्लोकौ आधानोद्धरणे तावद्यावद्दोलायते मनः। पदस्य स्थापिताः शब्दपाकं प्रचक्षते ४० कवित्वबीजं
प्रतिभानम् ४१ कवित्वस्य बीजं कवित्वबीजम्। आत्मगतसंस्कारविशेषः कश्चित्। यस्माद्विना काव्यं न निष्पद्यते। निष्पन्नं वा हास्यायतनं स्या
त् ४१ चित्तैकाग्र्यमवधानम्। ४२ चित्तैकाग्र्यं बाह्यार्थविनिवृत्तिस्तदवधानम्। अवहितं हि चित्तमर्थान्पश्यति ४२ तद्देशकालाभ्याम्॥४३ तदव
धानं देशकालाभ्यां संपद्यते ४३ कौ देशकालावित्यत आह। विविक्तो देशः ४४ विविक्तो विजनः ४४ रात्रियामस्तुरीयः कालः ४५ रात्रेर्या राम॰
मो रात्रियामः। तुरीयश्चतुर्थः काल इति। तद्वशाद्विषयानुपरक्तं प्रसन्नं चित्तमवधत्ते ४५ एवं काव्याङ्गान्युपन्यस्य काव्यविशेषकथना ३

र्यमाह। काव्यं गद्यं पद्यं च ४६ गद्यस्य पूर्वनिर्देशो दुर्लक्ष्यविशेषत्वेन दुर्बलत्वात्। यथाहुः। गद्यं कवीनां निकषं वदन्तीति ४६ तच्च त्रिधा भिन्न
मिति दर्शयितुमाह। गद्यं वृत्तगन्धि चूर्णकमुत्कलिकाप्रायं च ४७ तल्लक्षणमाह। पद्यभागवद्वृत्तगन्धि ४८ पद्यस्य भागाः पद्यभागास्तद्वद्यत्
यथा। पातालतालुतलवासिषु दानवेष्विति। अत्र हि वसन्ततिलकावृत्तस्य भागः प्रत्यभिज्ञायते ४८ अनाविद्धललितपदं चूर्णकम्॥
४९ अनाविद्धान्यदीर्घसमासानि ललितान्यनुद्धतानि पदानि यस्मिंस्तदनाविद्धललितपदं चूर्णकमिति। यथा। अभ्यासो हि कर्मणां कौशलमाव
हति। असकृन्निपातमात्रेणार्द्रबिन्दुरपि ग्रावाणि निम्नतामादधातीति ४९ विपरीतमुत्कलिकाप्रायम् ५० विपरीतमाविद्धोद्धतपदमुत्कलि
काप्रायम्। यथा। कुलिशशिखरखरनखरप्रचयप्रचण्डचपेटापाटितमत्तमातङ्गमदच्छटाच्छुरितचारुकेसरभारभासुरमुखः केसरीति।
५० पद्यमनेकभेदम् ५१ पद्यं खल्वनेकेन समार्धसमविषमादिना भेदेनोपेतमिति ५१ तदनिबद्धं निबद्धं च ५२ तदिदं गद्यपद्यस्वरूपं का
व्यं निबद्धमनिबद्धं च। अनयोः प्रसिद्धत्वाल्लक्षणं नोक्तम् ५२ क्रमसिद्धिस्तयोः स्रगुत्तंसवत् ५३ तयोरिति निबद्धानिबद्धयो रूप्यते। क्रमेण
सिद्धिः क्रमसिद्धिः। अनिबद्धसिद्धौ निबद्धसिद्धिः। स्रगुत्तंसवत्। यथा स्रजि मालायां सिद्धौ क्रमसिद्धिः। अनिबद्धसिद्धानिबद्धसिद्धिः। स्रगुत्तंसव
दामुत्तंसः शेखरः सिद्ध्यतीति ५३ केचिदनिबद्धा एव पर्यवसितास्तद्दूषणार्थमाह। नानिबद्धं चकास्त्येकतेजःपरमाणुवत् ५४ न खल्वनिबद्धं काव्यं च
कास्ति दीप्यते यथैकतेजःपरमाणुरिति॥ अत्र श्लोकः। असंकलितरूपाणां काव्यानां नास्ति चारुता। न प्रत्येकं प्रकाशन्ते तैजसाः परमाणवः॥
५४ संदर्भेषु दशरूपकं नाटकादि श्रेयः कस्मात्। तद्धि विचित्रं चित्रपटवद्विशेषसाकल्यात् ५६ तद्दशरूपकं हि यस्माद्विचित्रं चित्रपटवद्विशेषाणां

४ साकल्यात् ५६ ततोऽन्यभेदक्लृप्तिः ५७ ततो दशरूपकादन्येषां कथाख्यायिकादीनां क्लृप्तिः कल्पनमिति । दशरूपमेव हीदं विशिष्टितम् । यद्वत् कथाख्यायिकाम
हाकाव्यमिति । तल्लक्षणं च नातीव हृदयङ्गममित्युपेक्षितमस्माभिस्तदन्यतो ग्राह्यमिति ५७ काव्यालङ्कारवृत्तौ शारीरे प्रथमेऽधिकरणे तृतीयोऽ
काव्य ध्यायः ३ काव्यालङ्कारे विदोषाः ... काव्यशरीरस्याधिकाम सौन्दर्यक्षेपहेतवस्त्यागाद्ये दोषास्तानथाहेति दोषदर्श स्मा
नमधिकरणमारभ्यते । दोषस्वरूपकथनार्थमाह । गुणविपर्ययात्मानो दोषाः ५८ गुणानां वक्ष्यमाणानां ये विपर्ययास्तदात्मानो दोषाः ५९ अर्थतस्तदव
५ गमः ५८ गुणस्वरूपनिरूपणात्तेषां दोषाणामवगमोऽर्थात् सिद्धः ५८ किमर्थं तर्हि पृथक्प्रतिपादनमित्यत आह सौकर्याय प्रपञ्चः ६० सौकर्यार्थं प्रप
ञ्चो दोषाणाम् ६० उद्दिष्टलक्षणा हि दोषाः सुविज्ञाना भवन्तीति पददोषान्दर्शयितुमाह । दुष्टपदमसाधुकष्टग्राम्याप्रतीतमनर्थकं च ६१ क्र
मेण व्याख्यातुमाह । शब्दस्मृतिविरुद्धमसाधु । शब्दस्मृत्या व्याकरणेन विरुद्धमसाधु पदम् । यथा 'अन्यकारकवैयर्थ्यमिति' । अत्र हि अन्यथैत तीपा
स्य स्येत्यादिनां दुक्को भवितव्यम् ६२ श्रुतिविरसं कष्टम् ६३ श्रुतिविरसं श्रोत्रकटुपदं कष्टम् । तद्धि 'र्नाग्रुम्फितं मञ्जुद्वजयति...या' अचूचुरच्चण्डि
पोलयोस्ते कान्तिद्रवं द्राग्विशदं शशाङ्कः ६३ लोकमात्रप्रयुक्तं ग्राम्यम् ६४ लोक एव प्रयुक्तं यन्न शास्त्रे तद्ग्राम्यं पदम् । यथा कष्टं कथं रोदिति फू
त्कृतेनात्र अन्यदपि भल्लगल्लादिकं द्रष्टव्यम् ६४ शास्त्रमात्रप्रयुक्तमप्रतीतम् ६५ शास्त्र एव प्रयुक्तं यन्न लोके तदप्रतीतं पदम् यथा । किं भा
षितेन बहुना रूपस्कन्धस्य सन्ति मे न गुणाः । गुणतद्रीकप्रेमेति मतेस्तु पालम्भः ६५ पूरणार्थमनर्थकम् ६६ पादपूरणमात्रप्रयोजनम रा०
अव्ययपदमनर्थकम् । दण्डापूपन्यायेन पदमनर्थकमेव । उदाहरणम् । उदितस्तु हास्तिकविनीलमयं तिमिरनिपीयकिरणैः सविता । अत्र तु ४

शब्दस्य पादपूरणार्थ एव प्रयोगो न वाक्यालङ्कारार्थः। वाक्यालङ्कारप्रयोजनं तु नानर्थकं खलु हि ह नेति ६६। सम्प्रति पदार्थदोषानाह। अन्यनेयगू
ढाश्लीलक्लिष्टानि च। ६७ दुष्टं पदमित्यनुवर्तते। अन्यार्थादिद्वन्द्वपरिणामेन संबन्धः। अन्यार्थादीनि पदानि दुष्टानीति सूत्रार्थः ६७ एषां क्रमेणल
क्षणान्याह। रूढिच्युतमन्यार्थम् ६८ रूढिप्रसिद्धिमनपेक्ष्य यौगिकार्थोपादानादन्यार्थपदं स्यात् लत्वात्समान्येनान्यार्थं नोक्तम्। उदाहरण
म्। ते दुःखमुच्चावचमावहन्ति ये प्रस्मरन्ति प्रियसंगतानाम्। अत्रावहतिः करोत्यर्थे धारणे प्रयुक्तः। प्रक्रमः प्रस्मरतिर्विस्मरणार्थः प्रकृ
त्स्मरणादिति ६८ कल्पितार्थं नेयार्थम् ६९ असौ तस्यासम्यापर्यस्यार्थस्यैकल्पनात्कल्पितार्थं नेयार्थमिति। यथा: सपदि पङ्क्तिविहङ्गमना
मभृत्तनयसंवलितं बलिशालिना। विपुलपर्वतवर्षिशितैः शरैः प्लवगसैन्यमुलूकजिता जितम्। विहङ्गमस्य क्रवाकोऽभिप्रेतः तस्य नामा
नि च क्रानि बिभर्तीति। विहङ्गमनामभृत् तोरथाः। पङ्क्तिरिति दशसंख्या लक्ष्यते। पङ्क्तिर्दशविहङ्गमनामभृतो यस्य स पङ्क्तिविहङ्गनामभृद्दशर
थः। तत्तनयाभ्यां रामलक्ष्मणाभ्यां संवलितम्। उलूकजिता। इन्द्रजिता। कौशिकशब्देनेन्द्रोलूकयोरभिधानमिति। कौशिकशब्दवाच्यत्वेनेन्द्र
उलूकशब्दोक्तः। तन्नैवेवं रथाङ्गनामादीनामपि प्रयोगोऽनुपपन्नः। न। नेयार्थस्य रूढिलक्षणत्वात्। ६९ अप्रसिद्धार्थप्रयुक्तं गूढार्थम् ७० यस्य
पदस्यानेकोऽर्थः प्रसिद्धोऽप्रसिद्धश्च तदप्रसिद्धेऽर्थे प्रयुक्तं गूढार्थमिति यथा सहस्रगोरिवानीकं दुःसहं भवतः परैः। सहस्रं गावोऽक्षीणि
यस्य स सहस्रगुरिन्द्रः। तस्येवेति। गोशब्दस्याक्षिणि न भूयसी प्रसिद्धिरिति। ७१ असभ्यार्थान्तरमसभ्यस्मृतिहेतुश्चाश्लीलम्। ७१ न गुप्तल
क्षितसंवृतानि ७२ अपवादार्थमिदम्। गुप्तं लक्षितं संवृतं चैव नाश्लीलम् ७२ लक्षणान्याह। अप्रसिद्धासभ्यं गुप्तम् ७३ असभ्यार्थान्तरपदम्।

५

अप्रसिद्धासमर्थं गुप्तम्· यथा सम्बाध इति पदम्· तद्धि संकटार्थ प्रसिद्धं न गुप्तार्थमिति ७३ लाक्षणिकासमर्थ लक्षितम् ७४ तदेवासमर्थापी
न्नरं लाक्षणिकेनासमर्थेनान्वितं पदम्· लक्षितम्· यथा जन्मभूमिरिति: तद्धि लक्षणया गुप्तार्थेन स्वसत्त्वेति ७४ लोकसम्वीतं संवृतम्·
७५ लोकसम्वीतं संवृतम्· यथा सुभगाभगिनी· उपस्थानम्· अभिप्रेतं कुमारीदोहदमिति॥ अत्र श्लोकः सम्वीतस्य हि लोके न न दोषान्वेषणं
क्षमम्· शिवलिङ्गस्य संस्थानं कस्यासभ्यत्वभावना ७५ तन्नैविध्यम्· व्रीडाजुगुप्साऽमङ्गलातङ्कदायिभेदात्· ७६ अस्योश्लीलस्य त्रैविध्यं भवति:
व्रीडाजुगुप्साऽमङ्गलातङ्कदायिभेदात् किञ्चिद्व्रीडादायि भवति· यथा· वाक्काटं वृहि स्वापरेताइति· किञ्चिज्जुगुप्सादायि पिपासाकपर्द इति· किञ्चिदमङ्ग
लातङ्कदायि· यथा संस्थितइति व्यवहितार्थप्रत्ययं क्लिष्टमिति ७७ अर्थप्रतीतिरर्थप्रत्ययः स व्यवहितो यस्माद्भवति· तद्व्यवहितार्थप्रत्ययं
क्लिष्टमिति· यथा· दक्षात्मजादयितवल्लभवेदिकानां ज्योत्स्नाजसां जललवास्तरलं पतन्ति· दक्षा

राम· ५

चेत्। लक्षणाच्युतवृत्तभिन्नवृत्तम्. ८० स्वस्माल्लक्षणाच्च्युतं वृत्तं यस्मिंस्तल्लक्षणाच्युतवृत्तं वाक्यं भिन्नवृत्तम्. यथा. अपि पश्यसि सौधमा
श्रितामाविरलसुमनोमालभारिणीम्। वैतालीययुग्मपादे लघ्वक्षराणां षण्णां नैरन्तर्यं निषिद्धं तच्चात्र च्युतमिति भिन्नवृत्तम् ८० विरसविश्र
मयतिभ्रष्टम् ८१ विरसः श्रुतिकटुर्विरामो यस्मिंस्तद्विरसविश्रमयतिभ्रष्टम् ८१ तद्धातुनामभागभेदस्वरसन्धिकृते प्रायेण ८२ तद्यति
भ्रष्टं धातुभागभेदे नामभागभेदे च भवति। स्वरसन्धिनाऽकृते प्रायेण बाहुल्येन। धातुभागभेदे यथा। एतासां राजति सुमनसां दाम कण्ठा
वलम्बि। नामभागभेदे यथा। कुरङ्गाक्षीणां कुण्डलतलफलके स्वेदविरसः दुर्दर्शश्च काशिखिकपिशः शार्ङ्गिणो बाहुदण्डः। धातुनाम

६ भागग्रहणात् । तद्भागातिरिक्तभेदेन भवति । यतिभ्रष्टं यथा । सोमांशुरम्यमधिरलः सुन्दरीणां प्रबोधः । विनिद्रश्यामान्ते षधरयुदरीका
रविरुचैः । स्वरसन्धिकृतम् इति वचनात् स्वरसन्धिकृतभेदेन दोषः । यथा । किञ्चिद्भावानसमः स्मरलप्रेक्षितं कामिनीनाम् । ८२ नवत्रदोषात्वधस्य
निदोषो वक्रोक्तो वृत्तस्य पद्यात्मकत्वात् । पद्यात्मकं हि वृत्तमिति । वृत्त एव यतिभ्रष्टत्वस्यान्तर्भावान्न पृथग्ग्रहणं कार्यमिति ॥ लक्षणः पृथ
क्वात् ८३ नायं दोषो लक्षणोल्लङ्करणस्य पृथक्कृतात् । अन्यद्धि लक्षणं छन्दस्यान्यद्वयतेः । गुरुलघुनियमात्मकं हि वृत्तम् । विरामात्मिका यतिरि
6 ति ८३ विरूपपदसन्धि विसन्धि ८४ पदानां सन्धिः पदसन्धिः परस्परसमवायरूपः प्रत्यासत्तिमात्ररूपो वायस्मिन्निति विग्रहः ८४ पद
सन्धेर्वैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं चा ५ विश्लेषोऽविग्रहः । अश्लीलत्वमसभ्यस्मृतिहेतुत्वं कष्टत्वं पानष्यमिति । विश्लेषो यथा । क
मलेइव लोचने इमे अनुबध्नाति विलासपद्धतिः । नीलालकानुविद्धानि आननानि च कासिरे इति । अश्लीलत्वं यथा । विवेचकमिदं न्त्यमा
र्याभावयोचितम् ॥ चकासे पनसप्रायैः पुरी षण्डमहाद्रुमैः । विनाशपयदानाम्नायदवारदुक्तुकम् । कष्टत्वं यथा । सज्जेन्दुहमगर्भास्ते गुर्वी
भोगाद्रुमा वभुः ८५ एवं वाक्यदोषानभिधाय वाक्यार्थदोषनिरूपणार्थमाह ॥ व्यर्थैकार्थसन्दिग्धायुक्तापक्रमलोकविद्याविरुद्धानि च ८६ वाक्यानि
दुष्टानीति संबन्धः । क्रमेणाम्याख्यातुमाह । व्याहतपूर्वोत्तरार्थमपार्थम् ८७ व्याहतौ पूर्वोत्तरार्थौ यस्मिन् तद् व्याहतपूर्वोत्तरार्थं व्यर्थम् । यथा । अद्यापि
स्मरति रसोल्लससन्मनो मे मुग्धा या स्मरचतुराणि चेष्टितानि । यदि स्मरचतुराणि चेष्टितानि ननु हि मुग्धा या इति पूर्वोत्तरयोर्विरोधाद्व्यर्थमिति
८७ उक्तार्थपदमेकार्थम् ८८ उक्तार्थानि पदानि यस्मिंस्तदुक्तार्थपदमेकार्थमिति । यथा ॥ निन्नामोहममन्दमत्र तनुते विप्रेक्षितं सुभ्रुवः । अन

राम ६

ङ्गः स्य ङ्गारस्तस्य चिन्तामोहात्मकत्वाच्चिन्तामोहशब्दौ प्रयुक्तावुक्तार्थौ भवतः। एकार्थपदत्वाद्वाक्यार्थमित्युक्तम् ८८ न विशेषयेत् ८९
न उक्तार्थे द्वे पदे विशेषणः प्रतिपाद्यः स्यात् ८९ तं दार्शयितुमाह: धनुर्ज्याध्वनौ धनुःश्रुतिरारूढेः प्रतिपत्तये ९० धनुर्ज्याशब्दे ज्याशब्देनोक्तार्था
पि धनुःश्रुतिः प्रयुज्यते। आरूढेः प्रतिपत्त्यै। आरोहणस्य प्रतिपत्त्यर्थम्। न हि धनुःश्रुतिमन्तरेण धनुष्यारूढा ज्या धनुर्ज्येति शक्यं प्रतिपत्तुम्। य
था। धनुर्ज्याकिणचिह्नेन दोष्णु विस्फुरितं तवेति ९० कर्णावतंसश्रवणकुण्डल। शिरःशेखरेषु कर्णादिनिर्देशः सन्निधेः प्रतिपत्तये ९१ कर्णाव
तंसादिषु शब्देषु कर्णादीनाम् अवतंसादिपदैरुक्तार्थानां सन्निधेरवतंसादीनां प्रतिपत्तिरिति। यथा: दोलाविलासेषु विलासिनीनां कर्णावतंसाः कलय
न्ति कम्पम्। लीलाचलच्छ्रवणकुण्डलमापतन्ति। आयत्तमर्जुनमुखराः शिरःशेखरशालिनः। भा १ मुक्ताहारशब्दे मुक्ताशब्दः शुद्धेः ९२ मुक्ताहा
रशब्दे हारशब्देनैवगतार्थो मुक्ताशब्दः प्रयुज्यते शुद्धेः प्रतिपत्त्यै। विभ्रमप्रतिपत्तिभिः। मुक्ताहारेण हसता हसतीव स्तनद्वयम् ९२ पुष्पमालाशब्दे
पुष्पपदमुत्कर्षस्य ९३ पुष्पमालाशब्दे मालाशब्देनैवगतार्थे पुष्पपदं प्रयुज्यते। उत्कर्षस्य प्रतिपत्त्यर्थमिति उत्कृष्टानां पुष्पाणां माला
पुष्पमालेति। यथा: प्रयासाः पुष्पमालेव कन्यका कं न लोभयेत्। ननु च मालाशब्दोऽन्यत्रापि दृश्यते। रत्नमाला। पुष्पमालेति। उपचरितस
प्रयोगः। निरुपपदो हि मालाशब्दः पुष्परचनाविशेषमभिधत्ते इति ९३ करिकलभशब्दे करिशब्दस्तादृष्यस्य ९४ करिकलभशब्दः कलभे
नैवगतार्थः प्रयुज्यते। तादृष्यस्य प्रतिपत्त्यर्थमिति। करिपोतः कुञ्जरस्तद्रूपः कलभः करिकलभ इति: यथा। त्वडकरिकलभप्रेमबन्धं
करिणामिति ९४ विशेषणस्य च ९५ विशेषणस्य प्रतिपत्त्यर्थमुक्तार्थस्य शब्दस्य प्रयोगः। यथा। उगादमधुरां वाचं विशदाक्षरशालि

१ लिनीम् ९४ तदिदं प्रयुक्तेषु ९५ तदिदं ऽक्तं प्रयुक्तेषु नाप्रयुक्तेषु । न हि यथा भवति सवर्णाकुशलमिति । यथा नितम्बकाञ्चीत्यपि । यथा वा क
पिकलभ इति । तथा स्त्यबलम इति ९६ संशयकृत्संदिग्धम् ९७ यद्वाक्यं साधारणानां धर्माणां स्तुतेर्विधिपदानाम्नाम्नः संशयं करोतीति संशय
कृत्संदिग्धम् । यथा स महात्मा भाग्यवशान्महापदमुपागतः । किं भाग्यवशान्महापदमुपारगः । आहोस्विदभाग्यवशान्महतीमापदमि
ति संशयकृद्वाक्यं प्रकरणाद्यभावे सतीति ९७ तत्संभावितार्थं परिकल्पनामायोनेयादिपरिकल्पितार्थमप्रयुक्तम् ९८ नेयादिनायपरि
कल्पितोऽर्थो यस्मिंस्तन्नेयादिपरिकल्पितार्थमप्रयुक्तम् । अतो ऽक्तं समदिपं क्तिविहङ्गमेन्यादिकमुदाहरणम् ॥ क्रमहीनार्थमपक्रमम्
९९ उद्देशिनामनुद्देशिनां च क्रमः संबन्धः क्रमस्तेन हीनार्थो यस्मिंस्तत्क्रमहीनार्थमपक्रमम् । यथा कीर्तिप्रतापौ भवतः सूर्याचन्द्रम
सोः समौ । अथवा प्रधानस्यार्थस्य पूर्वनिर्देशस्तेन हीनार्थो यस्मिंस्तदपक्रमम् । यथा ऽनुरङ्गमथ मातङ्गं प्रयच्छास्मै मरालसमिति
९९ देशकालस्वभावविरुद्धार्थानि १०० देशकालस्वभावैर्विरुद्धा । अर्था येषु तानि देशकालस्वभावविरुद्धार्थानि वाक्यानि । लोकवि
रुद्धानि ॥ अर्थहारेण लोकविरुद्धत्वं वाक्यानाम् । देशविरुद्धार्थं यथा सौवीरेष्वस्ति नगरी मथुरा नाम विश्रुता । अक्षोडनालिकेराढ्या
यस्याः पर्यन्तभूमयः । कालविरुद्धं यथा कदम्बकुसुमस्मेरं मधौ वनमशोभत । स्वभावविरुद्धं यथा लोलालिसंगमुखरासु च मञ्जरीषु राम॰
सप्तच्छदस्य चरतीव शरन्मुखश्रीः । समुद्धृदस्य पञ्चकाम यतिनमज्ज्य इति स्वभावविरुद्धमात यामङ्कुरकलिकाको घस्तथास्य १
ध्रायपौयतेः यथा गोः पदपदं हि ववर्षं बहुलं मधुकलिकायाः सर्वस्याम करन्दस्येव तावद्धाहुल्यं स्वभावविरुद्धम् । कलावतुर्वर्ण

शास्त्रविरुद्धार्थानि ॥ कलाशास्त्रैश्चतुर्वर्गशास्त्रैर्विरुद्धार्थो येषु तानि कलाशास्त्रविरुद्धार्थानि वाक्यानि वाक्यानीति विधाविशेषोऽर्थद्वारकः।
कलाशास्त्रविरुद्धार्थकं यथा। कालिङ्गं लिखितमिदं वयस्य पत्रं पत्रहेर पतित तकोऽदिकणाकायमा। कालिङ्गं पतितनाग्रकणकमिति पत्रविदामा
म्नायः। तद्विरोधात्कलाशास्त्रविरुद्धम्। एवं कलान्तरेष्वपि विरोधोऽभ्यूह्यः। चतुर्वर्गशास्त्रविरुद्धानि तदाहियन्ते। कामोपभोगसाफल्य
फलो राज्ञां महीजयः। धर्मफलोऽश्वमेधादियज्ञफलो वा राज्ञां महीजयपुरस्सरागमः। तद्विरोधाद्धर्मशास्त्रविरुद्धार्थमेतद्वाक्यम्। अहङ्कारेण
जीयन्ते द्विषन्तः किं नयश्रिया। द्विषज्जयप्रस्थनयमूलत्वं स्थितं तद्गुणनीतौ तद्विरोधादर्थशास्त्रविरुद्धार्थम्। दष्टा नाङ्कपवित्रितो नरो हरति विदा
लसमाननं स्मराग्नि। अत्र रोष्टम नर्मुखं नयनान्ते च मुत्काचुम्बनवहुरः स्थानानीति कामसूत्रे स्थितं तद्विरोधात्कामशास्त्रविरुद्धार्थमि
ति द्विकलाभाक्तितो मुक्तिर्न तत्त्वज्ञानसम्पदा। एतस्यार्थस्य मोक्षशास्त्रेऽस्थितत्वान्न विरुद्धार्थम्। एते वाक्यार्थदोषास्त्यागाय पुंसे याइति
पि त्वन्ये शब्दार्थदोषाः सन्त्यास्ते गुणविवेचन एव सज्जि। उपमादोषाश्चोपमाविचार इति ॥ इति दोषदर्शने द्वितीयेऽधिकरणे द्वितीयो
ऽध्यायः। २ वाक्यवाक्यार्थदोषविभागः। समाप्तं चेदं द्वितीयमधिकरणम् ॥ २॥ यद्विपर्ययात्मानो दोषास्तान्गुणान्विचारयितुं गुणवि
वेचनमधिकरणमारभ्यते। तत्रौजःप्रसादादयो गुणाः। यमकोपमादयोऽलङ्कारा इति स्थितं काव्यविदां तेषां भेदनिवन्धनमित्याहः।
काव्यस्य शोभायाः कर्तारो गुणाः। ये खलु शब्दार्थयोर्धर्माः काव्यशोभां प्रकुर्वन्ति ते गुणाः। ते चौजःप्रसादादयो न यमकादयः केवलानां तेषा
मकाव्यशोभाकरत्वात्। ओजःप्रसादादीनां तु केवलानामस्ति काव्यशोभाकरत्वमिति ॥ तदतिशयहेतवस्त्वलङ्काराः। तस्याः काव्यशोभायाश्च

४. तिशयस्तदतिशयस्तस्य हेतवः। तुशब्दो व्यतिरेके। अलङ्कारा यमकोपमादयः। तत्र श्लोकौ। युवतेरिव रूपमङ्ग काव्यं स्वदते शुद्धगुणं तदप्यतीव विहितप्रण
यं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः॥ यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः। अपि जनदयितानि दुर्भगत्वं नियतमलंकरणा
नि संश्रयन्ते॥ २ पूर्वे नित्याः॥ पूर्वे गुणा नित्यास्तैर्विना काव्यशोभानुपपत्तेः। एवं गुणालङ्काराणां भेदं दर्शयित्वा शब्दगुणान्निरूपणार्थमाह ३ उः प्रसा
दश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः। बन्धः पदरचना तस्य गुणा बन्धगुणाः ३ ओजःप्रभृतयः। तान्क्रमे
ण दर्शयितुमाह। गाढत्वमोजः। बन्धस्य गाढत्वमोजः। तडिज्जटिलमाकाशमिति॥ मार्गाभेदः समता। मार्गस्याभेदो मार्गाभेदः स्व
कृताः येन मार्गेणोपक्रमस्तस्यात्याग इत्यर्थः। इह लोके प्रबन्धे चेति पूर्वोक्तमुदाहरणम्। विपर्ययस्तु यथा। प्रसीद चण्डि त्यज मन्युमञ्जसा कोऽ
यं वापपुरतः कृताञ्जलिः किमित्युदास्यं कठिनं तपीवरस्तनद्वयं त्वया लुप्तविलासमस्यते॥ आरोहावरोहक्रमः समाधिः॥ आरोहावरोहय
२ त्तदोजः यथा। विलुलितमकरन्दा मञ्जरीर्नर्तयन्ति। न पुनः। विलुलितमधुरा मञ्जरीर्लीलयन्ति॥ शैथिल्यं प्रसादः। बन्धस्येति वर्त
ते। बन्धस्य शैथिल्यं शिथिलत्वं प्रसादः। नन्वयमोजोविपर्ययात्मा दोषस्तत्कथं गुण इत्यत आह। गुणः संप्लवात्। गुणः प्रसाद ओजसा स
ह संप्लवात्। स च शुद्धस्तु दोष एवेति। ननु विरुद्धयोरोजःप्रसादयोः कथं संप्लव इत्याह। स त्वनुभवसिद्धः। संप्लवोऽनुभवसिद्धः। तद्विदां
रत्नादिविशेषवत्। अत्र श्लोकः। करुणप्रेक्षणीयेषु संप्लवः सुखदुःखयोः। यथानुभवतः सिद्धस्तथैवौजःप्रसादयोः। साम्योत्कर्षौ च॥ रामः
साम्यमुत्कर्षश्च ओजःप्रसादयोरनुभवादेव। साम्यं यथा। अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्त्वा यूने सितातपवा ८

8

रणाम्· कचिदोजः प्रसादाद्युत्कर्षम्· यथा· व्रजगमनं मल्लातक्याः फलेन सहोपमाम्· कचिदोजसः प्रसादस्योत्कर्षः यथा· कुसुमशय
नेन प्रत्यग्रं नमरीव योनवमेलयन्नेसर्वाङ्गीनेन वासिशियस्य यः। मसृणत्वं श्लेषः। मसृणत्वं यास्मिन्बहून्यपि पदान्येकवद्भासन्ते
स श्लेषः। यथा· नयुनः सत्रं ब्रालमुरः स्थले भ्रमरीवल्गुगीतयः। तडिज्जटिलमाकाशमिति· एवेतु श्लेषो भवेति· ब्रालसन्त्रमुरः स्थले भ्र
मरीमञ्जुगीतयः। तडिज्जटिलमाकाशमिति॥ ॥मार्गाभेदः समता· मार्गस्याभेदो मार्गाभेदः समता येन मार्गेणोपक्रमस्तस्यात्याग इत्यर्थः
श्लोके प्रबन्धे वेति पूर्वोक्तमुदाहरणम्। विपर्ययस्तु· यथा· प्रसीद चण्डि त्यज मन्युमञ्जसा ऊनस्तवायं पुरतः कृताञ्जलिः किमित्युपेक्षितपी
वरस्तनद्वयं त्वयालुमविलासमस्यति॥ आरोहावरोहक्रमः समाधिः। आरोहावरोहयोः क्रमः आरोहावरोहक्रमः समाधिः। परिहास्यारोह
स्यावरोहे सति· परिहारोवरोहस्यारोहे सति· तत्रारोहपूर्वकोवरोहः। यथा निरानन्दः कौन्दमधुनि परिभुक्तोज्झितरसे भ्रमरोपूर्वकस्त्वारो
होयथा· नेराः श्रीलभ्रष्टाभ्यसनद्धवमञ्जन्ति तावेः। आरोहस्य चक्रमोऽवरोहस्य चक्रम आरोहावरोहक्रमः। क्रमेण रोहणमवरोहणा
ज्येतिके चित्· यथा निवेशः स्वच्छिन्नोस्महिनगिरिवीथीक्रियते· न पृथगारोहावरोहयोरोजः प्रसादरूपत्वात्· न पृथक्समाधिर्गुणा
आरोह आरोहावरोहयोरोजः प्रसादरूपत्वात्· ओजोरूपस्त्वावरोहः प्रसादरूपश्चावरोह इति॥ न संपृक्तत्वात्· यदुक्तमोजःप्रसाद
रूपत्वमारोहावरोहयोस्तन्न संपृक्तत्वात्· संपृक्तौ खल्वोजःप्रसादौ नदीवेणिकावद्दृश्येते। अनेकान्तश्च। न चायमेकान्तो यदोजस्या
रोहः प्रसादश्चावरोह इति। ओजःप्रसादयोस्तीव्रावस्थातादिति चेदभ्युपगमः॥ ओजःप्रसादयोः कचिद्द्वागेतीव्रावस्था सा चारोहावरोहा

९ स्येति॰ एवं चेन्मन्यसेऽस्तु परामर्शः। न च प्रतिपत्तिः। विशेषायेत्वात्तयोः सच विशेषो रागादस्याख्यास्येयम॰ क्रमविचानार्थत्वात्पृथक्करणा
म॰ः पाठधर्मत्वं चेन सम्भवतीति॰ न पाठधर्मः सर्वत्राद्दष्टेरित्यत्र वक्ष्यामः। पृथक्पदत्वं माधुर्यम्॥ बन्धस्य पृथक्पदत्वं यत्र त्वां तु गोराया ह्न्या
काख्येयम॰ क्रमविधानार्थत्वात्पृथक्करणम्॰ पाठधर्मत्वं चेन सम्भवतीति॰ न पाठधर्मः सर्वत्राद्दष्टेरित्यत्र वक्ष्यामः। पृथक्पदत्वं माधुर्यम्॥
९ सर्वोक्तमुदाहरणम्॰ विपर्ययस्तु: निरानन्दे निर्दिष्टे तिप्रियजनसहस्त्व्यवसितिः सुधासेकप्रायोफलमपि विरूढं मम हृदि। विकटत्वमुदारता॥
बन्धस्य विकटत्वं यदसावुदारता: पृष्ठिन्त्याति नृत्यन्तीव पदानीति जनस्य वर्णना भवति॰ तद्धि कुटत्वेलीलायमानत्वमित्यर्थः। यथा:स्व
चरणाविनिषेषैर्नूपुरैर्नर्तकीनाकरितिरणितमासीत्तत्र चित्रं कलं च वः। न पुनः चरणकमलपुक्तेर्नूपुरेर्नर्तकीनामरितिरणितमासी
न्मञ्जु चित्रं च तत्र॥ अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः॥ यस्मात्प्रतिस्थार्थप्रतिपत्तिहेतुत्वं स गुणोऽर्थव्यक्तिरिति। पूर्वोक्तमुदाहरणम्॰ प्रत्युदा
हरणं भयः सुलभं च अज्ज्वल्ये कान्तिः॥ बन्धस्योज्ज्वलत्वं नाम यदसौ कान्तिरिति॰ तदभावे पुराणच्छायेत्युच्यते॰ यथा: कुरङ्गीनेत्राकु
लवकितवनालीपरिसरा॰ विपर्ययस्तु भपाने श्लोकाक्तात्रभवति ग्पदस्यासस्य गाढत्वं वदन्त्योजः कवीश्वराः अनेनाधिष्ठितोः
प्रायः शब्दाः श्रोत्ररसायनम्। श्लथत्वमोजसा मिश्रं प्रसादं च प्रचक्षते॰ अनेन न विना सम्यक्स्वदते काव्यपद्धतिः। यत्रैकपदवद्भावः
पदानामपभासमपिः अनालक्षितसन्धीनां स श्लेषः परमो गुणः॥ आरोहन्त्यवरोहन्ति क्रमेण यतयो हि यत्। समाधिर्नाम स गुणा राम॰
स्तेन पूता सरस्वती॥ बन्धे पृथक्पदत्वं च माधुर्यमुदितं बुधैः। अनेनैव पदन्यासः कामधेनामधुरः स्मृतः। येयाहि च्छिद्यते रेखा चतुरंचि ९

त्रपरिणीते ॥ तथैव वागपि प्रज्ञैः समस्तपदविप्लुता ॥ वध्रस्या जठरत्वं च सौकुमार्यमुदात्तता । एते न वर्ज्जिता वाचो रूक्षत्वान्न स्मृति
समाः ॥ विकटत्वं चैवं श्लेषस्य कथयन्ति उदाहृतम् । वैचित्र्यं न प्रयुज्यन्ते यथान्याः पदक्रमाः ॥ पश्चादिव गतिर्वाचः पुरस्तादिव वस्तु
नः । यत्रार्थव्यक्तिहेतुत्वात्सोऽर्थव्यक्तिः स्मृतो गुणः ॥ अजरठत्वं कान्तिरित्याहुर्गुणं गुणविपश्चितः । पुराणचित्रस्थानीयं तेन वन्ध्यं
वचः कवेः ॥ नासन्तः संवेद्यत्वात् ॥ न खल्वेते गुणास्त्वसन्तः संवेद्यत्वात् । नहि दृष्टम् संवेद्यत्वेपि भ्रान्ताः स्युरित्यत आह । न भ्रान्ता नि:
कम्पत्वात् । न गुणा भ्रान्ताः स्युः । तद्विषया प्रतिपत्तिर्निष्कम्पत्वात् ॥ न पाठधर्माः सर्वत्रादृष्टेः ॥ नैते गुणाः पाठधर्माः सर्वत्रादृष्टेः । य-
दि पाठधर्माः स्युर्विलक्षणयेकाः स्युः सन्तः सर्वत्र दृश्येरन् । न च सर्वत्र दृश्यन्ते । विशेषापेक्षं विशेषाणामगुणत्वाद्गुणाभ्युपगमश्च वे
ति ॥ काव्यालङ्कारे तौ गुणविवेचने तृतीयेऽधिकरणे प्रथमोऽध्यायः ॥ गुणालङ्कारविवेकः शब्दगुणविवेकश्च ॥ संप्रत्यर्थगुणवि-
वेचनार्थमाह । त एवार्थगुणाः । त एवौजःप्रभृतयोऽर्थगुणाः । शब्दार्थवाचकद्वारेण भेदं दर्शयन्ति । अर्थस्य प्रौढिरोजः । अर्थ-
स्य पदाभिधेयस्य प्रौढिः प्रौढत्वमोजः । पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा । प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च ॥ प-
दार्थे वाक्यरचनं यथा । अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः । अत्र चेन्द्रपदवाच्येऽर्थे नयनसमुत्थं ज्योतिरत्रेरिति वाक्यं प्रयुक्त-
म् पदसमूहस्य वाक्यमभिप्रेतम् । अनयादिशान्यदपि द्रष्टव्यम् । तद्यथा । पुरःपाण्डुच्छायं तदनु कपिलिम्ना कृतपदं ततः पाकोत्से-
कादरुणगुणाविशङ्कितवपुः । शनैः शोषारम्भस्थपुटनिजविष्कम्भविषमं वने वीतामोदं बदरमरसत्वं कलयति । न चैवमतिप्रसङ्गः । का

१० व्युशोभाकरत्वस्यगुणसाम्येन लक्षणास्याव्यवस्थितत्वात्। वाक्यार्थपद्याभिधानं यथा। दिव्येयं न भवति किं तर्हि मानुषीति वक्तव्ये निमित्ती
त्याहेति। अस्य च वाक्यार्थस्याध्यासः समसो। भासोयथा। अयं नानाकारो भवति सुखदुःखव्यतिकरः सुखं वा दुःखं वा न भवति न भवत्ये
व यतस्ततः पुनस्तस्माद् दुःखं भवति सुखदुःखं किमपि तद्गुनर्यस्माद् दुःखं भवति न हि दुःखं न च सुखमः। समासोयथा। ते हि मालयमामन्त्र्य पु
नः प्रेक्ष्य च मलिनम्। सिद्धे चास्मेति वेद्यार्थत्वे हि स्वप्नाः खमुखपुष्पम्लानाभिप्रायत्वं यथा। सोऽयं संप्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो नवो जा
तो भूपतिराश्रयः कृतधियां दिष्ट्या कृतार्थश्रमः। आश्रयः कृतधियामित्यस्य च वसुबन्धुसाचिव्योपक्षेपपरत्वात्ताभिप्रायत्वम्। एतेन रतिवि
गलितवेश्मकेशपाशे सुकेश्याः इत्यस्य साभिप्रायत्वमाख्यातम्॥ अर्थवैमल्यप्रसादः॥ अर्थस्य वैमल्यं प्रयोजकमात्रपरिग्र
हः प्रसाद इति। सवर्णा कन्यका रूपयौवनारम्भशालिनी। विपर्ययस्तु उपास्तां हस्तो मे विमलमणिकाञ्चीपदमिदं मा काञ्चीपादन्नि
त्यनेनैव निरतम्बस्य लक्षितत्वाद्विशेषणस्याप्रयोजकत्वमिति॥ घटनाश्लेषः॥ क्रमकौटिल्यानुल्बणत्वोपपत्तियोगो घटनाश्ले
षः। यथा दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादराद् एकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः। ईषद्वक्रितकंधरः सपुलकः
प्रेमोल्लसन्मानसामन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति। इत्यत्र दूकादिरचितेषु प्रबन्धेष्वप्यमुष्यात्रापञ्च इति। अवैषम्यं
समता॥ अवैषम्यं क्रमभेदः समता। क्वचिद्विक्रमो विधीयते। च्युतसुमनसः कुन्दाः पुष्पोद्गमेष्वलसा द्रुमा मलयमरुतः सर्पन्तीमे
वियुक्तधृतिच्छिदः। अथ च हन्ति तुः शीलोच्चासं लुलितमरीचयो नवकरण्डतामालम्बन्ते कुमोदयदायिनीम्॥ धातुसन्धिप्रति

राम· १०

पादनपरेऽन्न द्वितीयपादे प्रक्रमभेदो मलपमाहृतां साधारणत्वात्. एवं तु द्वितीयपादः पठितव्यः। मनसि च गिरं वध्नती मोगेरन्ति चको
किला इति। सुगमकत्वं वा अत्र वैषम्यमिति॥ अर्थदृष्टिः समाधिः॥ अर्थस्य दर्शनं दृष्टिः समाधिः। समाधिकारणत्वात्समाधिः। अवहितं चि
त्तमर्थान्यथोपपत्तीत्युक्तम्. अर्थो द्विविधः। अयोनिरन्यच्छायायोनिर्वा. अयोनिरनन्यकारणोऽवधानमात्रकारण इत्यर्थः। अन्यस्य काव
स्य छायान्यच्छाया तद्योनिर्वा. आशब्दपे हि ममसीधुभाजनाघावदग्रदत्तामैर्दश्यसे। वम्रमाः कुशलमस्ति लाञ्छितः खनयास्य
शिहिरोहिणीमयात्। मा भैः शशाङ्क मम सीधुनि नास्ति राहुः खे रोहिणी वसति कातर किं बिभेषि। प्रायो विदग्धवनितानवस
ङ्गमेषु पुंसां मनो विचलतीति किमत्र चित्रम्॥ एतस्य श्लोकस्यार्थोऽयोनिर्द्वितीयस्य तच्छायायोनिरिति॥ अर्थो व्यक्तः सूक्ष्मश्च॥
अर्थस्य दर्शनं समाधिरिति द्विधा। व्यक्तः सूक्ष्मश्च। व्यक्तः स्फुट उदाहृत एव। सूक्ष्मं तु व्याख्यातुमाह॥ सूक्ष्मो भाव्यो वासनीयश्च॥ सू
क्ष्मश्च. व्यक्तः स्फुट उदाहृत एव। सूक्ष्मं तु व्याख्यातुमाह॥ सूक्ष्मो भाव्यो वासनीयश्च॥ सूक्ष्मो द्विधा भवति. भाव्यो वासनीयश्च सूक्ष्म
निरूपणागम्यो भाव्यः। एकाग्रताप्रकर्षगम्यो वासनीय इति. भाव्यो यथा- अन्योऽन्यसंवलितमांसलदन्तकान्तिसोल्लाससस्मितवि
रसं वलितार्द्रतारम्। लीलागृहे प्रतिफलत्किलकिञ्चितेषु व्यावर्तमानवितयं मिथुनं चकास्ति॥ वासनीयो यथा: अवहितस्य चलित
जघनं विनिर्मिताभिमुखकुन्तरस्थित्वा. अवलोकितो हमनया दक्षिणाकरकलितहारलतम्॥ उक्तो वैचित्र्यं माधुर्यम्॥ उक्तो वै
चित्र्यं पृथक् माधुर्यम्. यथा रसवदमृतं कः सन्देहो मधुन्यपि नान्यथा मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम्। सकृदपि पुनर्म

११ धस्यः स न रसान्तरविनिर्विघ्नोऽवदत्तु यदिहान्यत्स्वादु प्रियावदनच्छदात्॥ अपारुष्यं सौकुमार्यम्॥ परुषोऽर्थः पारुष्यं सौमार्यमिति॥ य
था मृतं यमः शोषइत्याहुः एकाकिनदेवताहिती यगच्छतिसाचयेति॥ अग्राम्यत्वमुदारता॥ ग्राम्यत्वमुसङ्गे। ग्राम्यत्वमुदारतेति यथा:
त्वमेवं सौन्दर्या सच रुचिरता याः परिचितः सीमान्तं परमिह युवामेव भजथः। अपिद्वन्द्वं दिष्ट्या तदिह सुभगे संस्वरति वामतः शेष
यत्स्याज्जितमथ च तदानीं गुणिता तया॥ स्वपिति यावदयं निकटे जनः स्वापिमि तावदहं किमपेतितोऽति निगद्य शनैरनुमेखलं म
म मकरं स्वकरेण रुरोध सा॥ वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः॥ वस्तुनां स्वभावो वा नां स्वभावस्य स्फुटत्वं यद्सावर्थव्यक्तिः। यथा पा
देपुरः स्फुर शकलच्छविपिच्छदानारोजीभिरङ्कितमलक्तककलोदिनीभिः। गोरोचनार विततम्बुवहिः पलाशमामोदते कुसुम
मत्र सिपल्लवलस्य॥ प्रथममलसैः पर्यस्ताग्रे स्थितं पृथुकेसरैर्विरलविरलैरन्तः पात्रे मनाङ्मिलितं ततः। दनुवलनामात्रं किञ्चि
द्व्या पिवहि दले मुकुलनविच्छेदा जाना वमधकदर्शना॥ दीप्तरसत्वकान्तिः। दीप्ताः शृङ्गाराद्योयस्य स दीप्तरसस्तस्य भावो दी
प्तरसत्वं कान्तिः। यथा- प्रेयान्सो यमपाकृतः सशपथं पादानतः कान्तया द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः। ता
वत्प्रत्युतपाणिसंपुटलसन्नीवीनिबन्धं धृतो धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः॥ एवं रसान्तरेष्वप्युदाहरणी
यमिति॥ अत्र श्लोकः। गुणस्फुटत्वं साकल्यं काव्ययाकं प्रवक्षते। चूतस्य परिणामेन स च चोऽयमुपनीयते॥ सुप्तिङ्सं स्कारमात्रं रस०
यत्किञ्चिद्वस्तुगुणोभवेत् काव्यं वार्त्ताकुपाकं च तत्तु गुप्तं नेत्रनास्ततः। गुणानां दशतात्पर्य्यो यस्मात्तद्यार्थकं र· दाडिमानि दर्शे ११

शेस्यादिन विचारज्ञमेव च॥ गुणविवेचनेनाम तृतीयेऽधिकरणे द्वितीयोऽध्यायः॥ अर्थगुणविवेचकः समाप्तश्चाधिकरणम्॥ गुण
निर्वर्त्या काव्यशोभा तस्या अतिशयहेतवो ऽलङ्कारास्तन्निरूपणार्थमालङ्कारिकमधिकरणमारभ्यते। तत्र शब्दालङ्कारौ यमका
नुप्रासौ क्रमेण दर्शयितुमाह। पदमनेकार्थमक्षरं वावृत्तं स्थाननियमे यमकम्। पदमनेकार्थं भिन्नार्थम् एकमनेकं वा। तद्वदक्षरमा
वृत्तं स्थाननियमे यमकम्॥ आह सा सजातीयेनैकार्थ्यैकदेशाभ्यामनेकपदव्याप्तिः स्थाननियमः। यानि पादभागवृत्तीनि यमका
नि दृश्यन्ते तेषु च्छेदा काव्यरसं स्थानयमकायेस्प्येव स्थाननियम इति स्थानकथनार्थमाह। पादः पादस्यैकस्यानेकस्य च भागाः स्थाना
नि। पादस्यैकस्य पादस्यादिमध्यान्तभागाः। अनेकस्य च पादस्य तथैव स्थानानीति। पादयमकं यथा· असज्जनवचो यस्य कलिकाम
धुराहितं मनः तस्य नस्याद् द्विषन्तेरोः कलिकामधुराहितम्॥ एकपादस्यादिमध्यान्तयमकानि· हन्ते हन्तारतादीनां धीरधीरर्चितातव:
कामंकामं नन्देकेली। भिस्त्यास्त्यादिवानिशम्॥ धनं परासुधनपरासुभिवो[illegible]तीसुकलं विकलं केशपाशमिभ्रमम्· प्रियतमं तु मनीष्व रससिक
तासिकतासिकताखिवनासुका॥ सुदृशो रसरेवकितवकितं भवतीस्थितिमस्ति मिनं स्तिमितम्· अपि हासलवस्तव कस्तव कम्नुलयेन्नतु का
मधुराम धुराम्॥ पदयोरादिमध्यान्तयमकानि यथा· भ्रमरभ्रमपुष्पाणि भ्रमरस्येपि वन्मधु· काकुन्दकुसुमप्रीतिः काकुं दत्त्वा विरोधियत॥
अप्यशक्यत्वप्रतोतुः खशक्यं तवात्मनि: वाच्योवाहीकनारीणां वेगवाहीकपोलयोः॥ सपदिक्रतपदस्य दीक्षितेनास्मि तरुचि नास्मरत
चदीक्षितेन· भवति वतरुजः सा चित्तदाहो न स्वलु मया कुत एव चित्तदाहो॥ एकान्तरपादान्तयमकं यथा· उद्भुजयति मृतानिरस्य राज्ञः

कुशासनसस्मितहासनविमुक्तस्वं तस्य क्षिप्र कुशासनम्॥ एवमेकान्तरपादादियमकान्युक्तानि॥ समस्तपादान्तयमकं च भवति। अहो नतन्नगतिवद्
१२ लास्यामवि लोकयन्नवीनशिशिरलास्याम्। मनः किमुत्ताम्यसि च त्वलास्यां कृतीसमराज्ञां यदि पुष्पलास्याम्॥ एवं समस्तपादादिमध्यमयम
कानि व्याख्यातव्यानि। अन्ये च शङ्करजाभेदाः सुधियोऽभ्यूह्याः। अक्षरयमकं च एकाक्षरमनेकाक्षरं च पकाक्षरं यथा। नानाविधेन काननाभे
१४ राराधिनमनोभुवा। विविक्ते नवमासेन ननतस्ततदद्यं नशाम। एवं स्थानान्तरयोगोऽपि दृष्टव्यः। सजातीयमेरन्तर्यं चास्य प्रकर्षो भवति। सचा
यं हरिप्रबोधे हरयतीयया। विविधवववनानागगर्द्ददनानाममनन्नज्ञनाना। रुरुशशललनानाववधुन्धुनानाममहिहितसनानान
नससुनाना॥ अनया वर्णयमकमाला॥ भङ्गान्तरुत्कर्षः। उत्कृष्टं खलु यमकं भङ्गद्भवति। शब्दच्छलापरिवर्त्तकचूर्णमिति भङ्गमाहुः।
एते खलु शब्दच्छलादयो यमकभङ्गाना प्रकारा भवन्ति। तानक्रमेणाव्याचष्टे। वर्णविच्छेदबलेन शब्दच्छलता वर्णानां विच्छेदो वर्णविच्छेदस्तस्य
बलेन यत्साम्यछलता। यथा। कलिकामधुकः कलिकाशब्दे विच्छेदः। काशब्दे धुशब्दे च तस्य बलेन लिमशब्दयोर्विच्छेदात्॥ सङ्गविनिवृत्तौ
स्वरूपापत्तिः परिवर्त्तकः। अन्यवर्णसंसर्गस्तद्विनिवृत्तौ स्वरूपस्यान्यरूपातिरस्कृतस्यापत्तिः परिवर्त्तकः। यथा। कलिकामधुग
र्हितमिति। अत्र। अर्हितामिति पदे गकारस्य व्यञ्जनस्य संसर्गोऽर्हितमित्यस्य स्वरूपापन्नं तत्तु व्यञ्जनस्य संगविनिवृत्तौ स्वरूप
पापद्यते। अर्हितमित्यन्यवर्णसङ्क्रमेणाभिन्नरूपस्य पदस्य तादृप्यविधेरयमिति तात्पर्यार्थः। एतेनेतरद्ग्वपि व्याख्यातो॥ पि॥ राम॰
पिण्डाक्षरभेदे स्वरूपलोपश्चूर्णम्॥ पिण्डाक्षरभेदे सतिपदस्य स्वरूपलोपश्चूर्णम्॥ यो च लमवति च लं हरसमुन्मुत्कमीनाकाम्यः १२

।साग्निर्विभर्त्ति च सलिलं हृरसमुन्मुक्तशुक्तिमीनां कान्तः। अत्र मुक्तिपदे कीतिपिण्डाक्षर तस्य भेदे मुक्तिपदं लुप्यते। ककारतकारयोर
न्यत्रसंक्रमात्। हृरसमुन्मुक्तसुगाचकुलम्। तिमीनीकान्तः समुद्रः। श्लोकाम्रात्रा। अखण्डवर्णविन्यासवलनं शंखलामता। अनेन खलु भङ्ग
नयमकानां विचित्रता॥ पदन्यसङ्क्षमुत्सृज्य नेपथ्यमिव नर्त्तकिः। एवं स्वरूपमारोहेत्सश्लेषः परिवर्त्तकः॥ पिण्डाक्षरस्य भेदेन पूर्वापरमपा
स्य याम्। वर्णयोः पदलोपोयः स भङ्गः मुराभिसंज्ञकः। अप्राचर्णभङ्गानि यथास्थानस्थितान्यपि। अलकालीवनाप्यर्थयमकानि च कुर्वन्ति॥
विभक्तिपरिणामेन पात्रभेदः क्वचिद्भवेत्। नतदिष्टं नियमकं यमकोत्कर्षकोविदाः। आरूढमपसायत्रुपदं यमकमभिकामात हृष्यन्त
पुनस्तस्य मुक्तानुप्रासकल्पना॥ विभक्तीनां विभक्तत्वं संख्यायाः कारकस्य च। आवृत्तिः सुप्तिङन्तानां स्थितियम्य यमकाद्भुतम्। शेषः स
रूपोऽनुप्रासः। पदमेकार्थमनेकार्थं च यस्याभिपतंतद्द्विर्मक्षरं च शेषः। सरूपोऽन्येन प्रयुक्तेन तुल्यरूपोऽनुप्रासः। ननु च शेषोऽनु
प्रास इत्येतावदेव सूत्रं कस्मान्न कृतम्। आवृत्तिशेषोऽनुप्रास इत्येव हि व्याख्यास्यते सत्यमास्ति चेत्यावृत्तिशेषे तुः किन्त्वव्याप्तिप्रसङ्गाद्विशे
षं च स्वरूपग्रहणम्। कास्मिंश्चेदावृत्तिः। कास्मिंश्चिदेवाभ्यां सारूप्यमिति॥ अनुल्बणो वर्णानुप्रासः श्रेयान्॥ वर्णानुप्रासः ख
लु अनुल्बणोऽलीनः श्रेयान्। यथा। चूचिन्मसृणामीसलकचिदतीवतारस्पदं प्रसन्नमधुरं क्वचित्सुरतरङ्गलीलाद्भितं मराहृदं
हितं वल्लकीरणितनिर्भरैर्गुम्फितं मनो मदयतीति मे सुमुखि साधु संगीतकम्॥ उल्बणास्तु न श्रेयान्॥ वल्लीबद्धोर्द्धजूटोद्भटमरति
चटेत्काटिकोदण्डचण्डमितिं॥ पादानुप्रासः पादयमकस्य॥ ये पादयमकस्य भेदास्ते पादानुप्रासस्येत्यर्थः तेषामुदाहरणानि यथा। कवि

१३
13

राजमविज्ञाय कुतः काव्यक्रियादरः। कविराजमविज्ञाय कुतः काव्यक्रियादरः॥ अखण्डयन्ति मुहरामूल्लकीपल्लानि बालानि बालकः विलो बनु
पिङ्गलानि॥ वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसंकाश काशाः काशाभा भान्ति तासां नवपुलिनगताः श्रीनदी हंसहंसाः। हंसाभाम्भो
दपुञ्जः स्फुरदमलवपुर्मेदिनीचन्द्रचन्द्रश्चन्द्राङ्कः शारदं ते जयकृदुपनतो विद्विषां कालकालः। कुवलयदलश्यामा मेघा विहाय दिवं गताः
कुवलयदलश्यामो निद्रां विमुञ्चति केशवः। कुवलयदलश्यामा श्यामलता प्रजृम्भते कुवलयदलश्यामं चन्द्रो नभः प्रविगाहते॥ ११२
एवमन्येऽपि भेदा द्रष्टव्याः। इति काव्यालङ्कारवृत्त्यामालङ्कारिके चतुर्थाधिकरणे प्रथमोऽध्यायः। शब्दालङ्कारविचारः। सम्प्रत्यर्थालङ्काराणां
प्रस्तावः। तन्मूलं चोपमेति सैव विचार्यते। उपमानेनोपमेयस्य लेशतः साम्यमुपमा। उपमीयते सादृश्यमानीयते येनोत्कृष्टगुणेना
न्यत्तदुपमानम्। यदुपमीयते सादृश्यमानीयते तन्न्यूनगुणं तदुपमेयम्। उपमानेनोपमेयस्य गुणलेशतः साम्यं यत्सा उपमितिरिति
। ननु चोपमेयमिति। उपमेयमिति संक्षिप्तशब्दावेतौ तयोरेकतरोपादानेनैवान्यतरसिद्धिरिति। यथा उपमितं व्याघ्रादिभिः सामान्याप्रयोगे
इति। अत्रोपमितग्रहणमेव कृतं नोपमानग्रहणमिति तद्वदत्रापि उभयग्रहणं न कर्तव्यम्। न कृतं लोकप्रसिद्धिपरिग्रहार्थः। यदेवोपमे
यमुपमानं च लोकप्रसिद्धं तदेव परिगृह्यते नेतरत्। न हि यथा मुखं कमलमिवेति तथा कुमुदमिवेत्यपि॥ गुणबाहुल्यतः क
ल्पिता॥ गुणानां बाहुल्यं गुणबाहुल्यं ततः उपमानोपमेयस्य कल्पितोपमा। कविभिः कल्पितत्वात् कल्पिता। पूर्वा तु लौकिकी॥ ननु
कल्पितायां लोकप्रसिद्ध्यभावात् कथमुपमानोपमेयनियमः। गुणबाहुल्यस्योत्कर्षापकर्षकल्पनाभ्याम्। तद्यथा। उद्गर्भहूणतरुणी राम०
रमणोपमर्दभुग्नोन्नतिस्तननिवेशनिभं हिमांशोः। बिम्बं कठोरबिसकाण्डकडारगौरैर्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति॥ सद्योमुण्डितम १३

नदूराच्चित्रकाप्रस्पर्द्धिभावगाकम् अभिनवं कुशसूचिस्पर्द्धि करोति सिरीषमिति॥ इदानीं पञ्चानां ररदद्लविश्लेषवतुरास्थितीनामा
वभ्रोस्फुरति शुकचञ्चुपुटनिभः। ततः स्त्री लोहनास्य मनधर कान्तितुलयितुं समन्तान्निपीति स्फुरत्सुभगा रागं किसलयम्॥ तद्द्विभ्र
म· पदवाक्यार्थवृत्तिभेदात्॥ तस्या उपमा याद्दूविभ्रम· पदार्थवाक्यार्थवृत्तिभेदात्। एका पदार्थवृत्तिरपरा वाक्यार्थवृत्तिरिति। पदार्थ
वृत्तिर्यथा· हरति तिरस्कुरुव मुक्त्वाजि कीर्णा सुधासां कनककलशधर्मी ममरोरसमभेदः वाक्यार्थवृत्तिर्यथा· पाण्ड्योऽयमंसार्पितल
म्बहारः कॢप्ताङ्गरागो हरिचन्दनेन। आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः। पूर्णा लुप्ता च॥ सा तूपमा पूर्णा लु
प्ता च॥ गुणद्योतकोपमानोपमेयशब्दानां सामग्र्यं पूर्णादिशब्दानां सामग्र्यपूर्णा यथा॥ कमलमिव मुखं मनोज्ञमिति॥ लोके तु सा गुणा
दिकानां विकल्पलोपे वैकल्ये तु सा· गुणशब्दलोपे यथा: शशीवरानना। ति·द्योतकशब्दलोपे यथा· दूर्वाश्यामेयमिति। उभयलोपे यथा: शशिमुखी
ति। उपमानोपमेयलोपस्तूपमाप्रपञ्चे द्रष्टव्यः॥ स्तुतिनिन्दातत्त्वाख्यानेषु॥ स्तुतौ निन्दायां तत्त्वाख्याने चास्याः प्रयोगः। स्तुतिनिन्दयोर्य
था· स्निग्धं भवत्यमृतकल्पमहो कलत्रं हाहाहलं विषमिवाप्रगुणान्तदेव। तत्त्वाख्याने यथा तारोहिणी विजानीहि ज्योतिषामग्रमेराउ
।पस्थिता तारकान्यासः शकटाकारमाश्रितः॥ हीनाधिकत्ववनभेदोऽसादृश्यासमञ्जसवद्भाति। तान्क्रमेणाख्यातुमाह॥ जातिप्रमा
णधर्मैर्न्यूनत्वेनोपमानस्य हीनत्वम्॥ जात्याप्रमाणेन धर्मेण चोपमानस्य न्यूनत्वे पाञ्चालीनवमिति। जातिन्यूनत्वरूपं हीनत्वं यथा॥ चण्डा
लैरिव युष्माभिः साहसं परमकृतम्। प्रमाणन्यूनत्वरूपहीनत्वम्· यथा· वह्निस्फुलिङ्ग इव भानुरयं चकास्ति· उपमेयत्वा

१४ दुपमानस्य यद्धर्मतो न्यूनत्वं धर्मन्यूनत्वेन तद्रूपं हीनत्वं यथा· समुन्निलीक्षितो मौक्त्या कृपाजिनपटं बृहन्· व्युराजन्नीलजीमूतभागाश्लि
ष्टइवांशुमान्।।अत्र मो ज्जीप्रति वस्तुतडिल्लास्ति।उपमानमिति हीनत्वं न च कृष्णाजिनपरमात्रस्योपमेयत्वमुक्तमस्मोऽज्यमथत्वप्रसङ्गा
त्।न च जीमूतग्रहणेनैव तडित्प्रतिपाद्यते।तत्र व्यभिचारात्· अव्यभिचारे वा संभवन्ती प्रतिपत्तिः केन वार्यते· तदाह।। चर्मयोरेकनिर्देशे
न्यसम्वित्साहचर्यात्।।चर्मयोरेकस्यापि चर्मस्यान्यस्य धर्मस्य सम्वित्प्रतिपत्तिर्भवति।कुतः साहचर्यात्· सहचरितत्वेन प्रसिद्धयोरवश्यमे
कनिर्देशेन्यस्य प्रतिपत्तिर्यथा· निर्विष्टपिवहिर्वनेन विरमत्यत्तर्जरिहि श्मनोल्कतातनुततिच्छितो मधुपपायि ड्कुः पयोविन्दवः।चूडा
वचरके निपत्यकविकाभावेन जाताः शिरोरुड्डः स्फालनमूर्तनिर्गरहिरोचिन्तव्यथादायिनः।मधुपपातां वृन्तत्वपिङ्गत्वे सहचरि
तेतत्र पिङ्गशब्देन पिङ्गत्वे प्रतिपन्ने वृन्तप्रतिपत्तिर्भवति·एतेन कनकफलकचतुरस्रश्रोणिबिम्बमिति व्याख्यातम्।कनकफल
कस्य गौरत्वचतुरस्रत्वयोः साहचर्यात्।चतुरस्रत्वसत्ये च गौरत्वप्रतिपत्तिरिति।ननु वयद्धि धर्मन्यूनत्वमुपमानस्य दोषः।कथम
प्रयोगः।सर्वाशुसंमीलिततलोचनेषु दीनेष्ठुपयानिलनिर्मदेषु।सात्वः स्वगेहे पिवमर्तिहीनाः केकाविनेमुः शिखिनीमुखेषु।।
अत्र बहुत्वमुपमेयधर्माणामसमानतः।न विशिष्टानामेव मुखानामुपमेयत्वात् तादृशेष्वेव केकाविनाशस्य संभवादतो धर्मन्यून राम०
त्वमुपमानस्येति·तेनाधिकत्वं व्याख्यातम्।एतेन हीनत्वेनाधिकत्वं व्याख्यातम्।।जातप्रमाणधर्मापि क्वचिदपि कृतचमिति।जातिप्रमा १४
धिक्यरूपमाधिकत्वं च यथा· विशन्तुरपुरः श्रीवृन्दुरुद्रादिव महोजसः।प्रमाणाधिक्यरूपं यथा·पातालमिव नाभिस्तेस्तनौ क्षितिधरोयमौ·

·वेत्तीदृशः पुनरयं कालिन्दी पात्रमस्तनिंमः। यथा मीलिकारूपं यथा· स्मरविभ्रमचञ्चलं चक्रं दधे देवी त्वं राजता सवा उवाग्निः स्मा[illegible]ः सोत सामिव
नायकः। स्फवाड वाग्निरित्युपस्योपमेयाभावाद्धर्मोऽधिकमिति· अनेयोर्द्वयोर्विपर्ययाख्यस्य दोषस्यान्तर्भावान्न पृथगुपादानम्· अत एवास्या
कंपडूपाइति॥ उपमानोपमेययोर्लिङ्गव्यत्यासो लिङ्गभेदः। उपमानस्योपमेयस्य लिङ्गयोर्व्यत्यासो विपर्ययो लिङ्गभेदः। यथा सैन्यानि
नद्य इव जग्मुरनर्गलानि॥ इष्टः पुन्नपुंसकयोः प्रायेण॥ पुन्नपुंसकयोरुपमानोपमेययोर्लिङ्गभेदः प्रायेण बाहुल्येनेष्टः। यथा चन्द्रमिव मुखं प
श्यामीति· इन्दुरिव मुखं भातीति। एवं प्रायग्रहणं नेच्छन्तीति॥ लौकिक्यां समासाभिहितायामुपमाप्रपञ्चे च॥ लौकिक्यामुपमायां समासाभिहि
तायामुपमाप्रपञ्चे द्वयोर्लिङ्गभेदः प्रायेणेति। लौकिक्यां यथा· छायेव सा तस्य· पुरुषस्य वरस्त्री॥ समासाभिहितायां यथा· भुजलतानी
लोत्पलसदृशा इति। उपमाप्रपञ्चे यथा· शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य· दूरीकृता· खलु गुणैरुद्यानलता वनलताभिः।
एवमन्यदपि प्रयोगजातं द्रष्टव्यम्॥ एतेन वचनभेदो व्याख्यातः॥ एतेन लिङ्गभेदेन वचनभेदो व्याख्यातः। यथा· पश्यामि लोचने तस्याः पु
ष्पपुष्पलिहो यथा॥ अप्रतीतगुणसादृश्यमसादृश्यम्॥ अप्रतीतेरिव गुणेनोपत्तं सादृश्यं यदप्रतीतगुणसादृश्यमसादृश्यम्· यथा· ग्रथ्ना
काव्यशशिनं विततार्थरश्मिम्· काव्यस्य शशिना यत्सादृश्यं यदप्रतीतगुणोऽस्तीति। ननु चार्थानां रश्मितुल्यत्वे काव्यस्य शशितुल्यत्वं भविष्यति
नैवम्· काव्यस्य शशितुल्यत्वे भविष्यति। नैवम्· काव्यस्य शशितुल्यत्वे सिद्धेऽर्थानां रश्मितुल्यत्वं सिध्यति। न चार्थानां रश्मीनां कश्चित्साद
श्यहेतुः प्रतीतो गुणोऽस्ति। तदेवमितरेतराश्रयदोषादुपहतेयम्॥ असादृश्यहता ह्युपमा तन्निष्ठाश्च कवयः। असादृश्यहता उपमा तन्निष्ठा

उपमानतिशायककवयः॥ उपमानाधिक्यात्तदपोहः भासमितं प्रशस्तेः कर्पूरादिभिरुपमानैर्बहुभिर्यशसः सादृश्यं स्पष्टापितं भवतीति ह्याधु
१५ क्तो गुणातिरेकत्वात्॥ नापुष्टार्थत्वात्॥ उपमानाधिक्यात्तदपोह इति यदुक्तं तन्न अपुष्टार्थत्वात्। एकस्मिन्नुपमाने प्रयुक्ते उपमानान्तरप्र
योगो न किञ्चिदर्थविशेषं पुष्णाति। तेन वल्लसिन्धुः सिन्धुरिव सुभिन्न इति प्रत्युक्तम्। ननु विधुरश्च दृष्टद्विः। प्रयोगास्त्यौ नरुत्यम्। अर्थविशेषात्।
वलेसिन्धुरिव वैपुल्यादृलसिन्धुः सिन्धुरिव सुभितः क्षोभसाम्यात्। तस्मादर्थभेदान्न पौनरुत्यम्। अर्थपुष्टिस्तु नास्ति। सिन्धुरिव सुभि
तः क्षोभसारूप्यात्। तस्मादर्थभेदान्न पौनरुत्यम्। अर्थपुष्टिस्तु नास्ति। सिन्धुरिव सुभित। एतावतैव वैपुल्यं प्रतिपत्स्यते। उक्तौ हि।
धर्मयोरेकनिर्देशेऽन्यस्य संवित्साहचर्यात्॥ अनुपपत्तिरसम्भवः॥ अनुपपत्तिरनुपपन्नत्वम्। उपमानस्यासम्भवः। यथा। चकास्ति
वदनस्यान्तः स्मितच्छाया विकासिनः। उन्निद्रस्यारविन्दस्य मध्ये मुग्धेव चन्द्रिका॥ चन्द्रिकायामुन्निद्रत्वमरविन्दस्येत्यनुपपत्तिः।
नन्वर्थविरोधोऽयमस्तु। किमुपमादोषकल्पनया। नोपमायामतिशयस्य विवक्षितत्वात्। कथं तर्हि दोषः। विरुद्धोऽयमतिशयस्य संग्रहे
न कर्तव्य इत्युपसूत्रस्य तात्पर्यार्थः। नानेतान्य उपमादोषान् ज्ञात्वा कविः परित्यजेत्॥ इति काव्यालङ्कारवृत्तौ चतुर्थाधिकरणे द्वि
तीयोऽध्यायः॥ उपमाविकारः॥ सम्प्रत्युपमाप्रपञ्चो विचार्यते। कः पुनरसावित्याह। प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः। प्रतिवस्तुप्रभृतिर्य
स्य स प्रतिवस्तुप्रभृतिः। उपमायाः प्रपञ्च उपमाप्रपञ्च इति। वाक्यार्थोपमायाः प्रतिवस्तुनो भेदं दर्शयितुमाह॥ उपमेयस्योक्तौ समा एम०
नवस्तुन्यासः प्रतिवस्तु॥ समानं वस्तु वाक्यार्थस्तस्य न्यासः समानवस्तुन्यासः। उपमेयस्य वाक्यार्थस्योक्तौ सत्यामिति। अत्र १५

द्वौ वाक्यार्थौ। एको वा वाक्यार्थ उपमायामिति भेदः। तद्यथा- देवीभावं गमिता परिवारपदं कथं भजत्येषा। न खलु परिभोगयोग्यं दैवतरूपा-
ङ्कितं रत्नम्॥ प्रतिवस्तुनः समासोक्तेर्भेदं दर्शयितुमाह। अनुक्तौ तु समासोक्तिः॥ उपमेयस्यानुक्तौ समानवस्तुन्यासः समासोक्तिः। संक्षे-
पवचनात् समासोक्तिरित्याख्याता। तद्यथा- श्लाघ्या धुस्ताधगम्लानिः करीरस्य मरौ स्थितिः। धिग्वीरोकल्पवृक्षाणामनुत्पन्नार्थिनां
श्रियः॥ किञ्चिदुक्तावप्रस्तुतप्रशंसा॥ उपमेयस्य किञ्चिदुक्तौ समानवस्तुन्यासोऽप्रस्तुतप्रशंसा। यथा- लावण्यसिन्धुरप-
रैव हि केयमत्र यत्रोत्पलानि शशिना सह संप्लवन्ते। उन्मज्जति द्विरदकुम्भतटी च यत्र यत्रापरे कदलकाण्डमृणालदण्डाः॥ अप्रस्तुत-
स्यार्थस्य प्रशंसनमप्रस्तुतप्रशंसा॥ अपह्नुतिरभिन्नतो भिन्नेति दर्शयितुमाह॥ समानवस्तुन्यासेनापह्नुतिः॥ समेन तुल्येन वस्तु-
ना वाक्यार्थेनान्यस्य वाक्यार्थस्यापलापो निह्नवो यस्तत्त्वारोपणात् सापह्नुतिः। यथा- न केतकीनां विलसन्ति सूचयः प्रवासिनो हन्त हसत्ययं
विधिः। तडिल्लतेयं न चकास्ति चञ्चला पुरः स्मरज्योतिरिदं विवर्तते॥ वाक्यार्थयोस्तात्पर्यात्तद्रूप्यमिति न रूपकम्। तत्तु कीदृशमित्याह॥ उ-
पमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम्॥ उपमानोपमेयस्य गुणसाम्यात्तत्त्वस्याभेदस्यारोपणमारोपो रूपकम्॥ उपमानो-
पमेययोरुभयोरपि ग्रहणम्। लौकिक्याः कल्पितायाश्चोपमायाः प्रकृतित्वमत्र यत्र प्रकृतिर्विज्ञायेत तत्। यथा- इयं गेहे लक्ष्मीरि-
यममृतवर्तिर्नयनयोरसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः। अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः किमस्या न प्रेयो य-
दि परमसह्यस्तु विरहः। मुखचन्द्रादीनां तूपमासमासानां न रूपकत्वं प्रयुक्तमिति॥ सधर्मेषु तन्त्रप्रयोगः श्लेषः॥ उपमानोपमेयस्य

९६ धर्मेषु गुणक्रियादिरूपेषु तन्त्रप्रयोगे तन्त्रेणोच्चारणे सति श्लेषः॥ यथा-अरुणा मतिर्मरुत्वान्यह च यः सन्नद्धवत्सः स्थूलाः
सोष्माणो व्रतिनो विपक्षहृदयप्रोन्माथिनः कर्कशाः। उद्वृत्ता गुरवश्च यस्य शशिनः श्यामायमानाननाः योधा मारवधुस्तनाश्च न द-
धुः क्षोभं स वो माञ्जिनः॥ यथा गौणस्यार्थस्यालङ्कारत्वं तथा लाक्षणिकस्यापीति लक्षयितुमाह॥ सादृश्याल्लक्षणा वक्रोक्तिः॥
बहूनि हि निबन्धनानि लक्षणायाम्। तत्र सादृश्याल्लक्षणा वक्रोक्तिरसाविति॥ यथा- उन्मीलनयनं सरसीनां कैरवं च निमिमील
मुहूर्तात्॥ नेत्रधर्माद्युन्मीलननिमीलने सादृश्याद्विकाशसंकोचौ लक्षयतः॥ इह च निरन्तरमविरलमुकुलपुलकिता हरति माधवी
हृदयं मदयति च केसराणां परिणतमधुगन्धि निश्वसितम्॥ अत्र निश्वसितमिति परिमलनिर्गमं लक्षयति। संस्थानेन स्फुर-
तु सुभगः स्वार्चिषा चुम्बतु घाम्॥ आलस्यमालिङ्गति गात्रमस्याः॥ परिम्लानच्छायामनुवदति दृष्टिः कमलिनीम्॥ प्रत्यग्रेषु सु-
रितकमलामोदमैत्रीकरवायवः। तुरुद्वन्दं तरुणाः कदलीकाण्डसब्रह्मचारि॥ इत्येवमादिषु लक्षणार्थो निरूप्यत इति। लक्षणायां
च झटित्यर्थप्रतिपत्तिक्षमत्वं रहस्यमाचक्षत इति॥ असादृश्यनिबन्धनातु लक्षणा न वक्रोक्तिः। यथा- जरठकमलकन्दच्छेदगौरैर्मयू-
खैः। अत्र सामीप्याद्वृत्तं लक्षयति। तेभ्यो न गौरत्वोपपत्तेः। रूपकवक्रोक्तिभ्यामुपमाभेदं दर्शयितुमाह॥ अतद्रूपस्यान्यथाध्यवसा-
नमतिशयार्थमुत्प्रेक्षा॥ अतद्रूपस्य तत्स्वभावस्यान्यथा तत्स्वभावतयाध्यवसानमध्यवसायः। न पुनरध्यारोपो लक्षणा वा। अ- राम॰
तिशयार्थमिति। भ्रान्तिज्ञाननिरासार्थम्। सादृश्यादियमुत्प्रेक्षेति॥ एतां च इवादिशब्दा द्योतयन्ति। यथा- स वः पायादिन्दुर्नवबिसल- ९६

ताकोटिकुटिलः स्मरार्यो मङ्क्षुज्वलनकपिशे भाति निहितः। स्तवन्मन्दाकिन्योः प्रतिदिवससिक्तेन यपसा कपालेनोन्मुक्तः स्फटिकध
वलेनाङ्कुर इव॥ उत्प्रेक्षैवातिशयोक्तिरिति केचित्तन्निरासार्थमाह॥ संभाव्य धर्मस्य तद्गुणोत्कर्षस्य कल्पनाऽतिशयोक्तिः। संभाव्यस्य धर्म
स्य तद्गुणोत्कर्षस्य च धर्मोत्कर्षस्य वकल्पनाऽतिशयो तत्तमालनीलमामुक्तमुक्तालतमस्य वक्षः। मलयजरसविलुप्ततनवो नवहा
रलताविभूषिताः सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः। शशभृति विततधाम्नि धवलयति धरामभिभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः॥ यथा भ्रान्तिमान् स्वरूपोत्प्रेक्षा तथा संशयप्रतानस्वरूपः सन्देहोऽपीति लक्ष
यितुमाह॥ उपमानोपमेयसंशयः। सन्देहः। उपमानोपमेययोरिति यस्य यः क्रियते संशयः सन्देहो यथा॥ इदं कर्णोत्पलं चक्षुरि
दं वेति विलासिनि। न निश्चिनोति हृदयं किन्तु दोलायते मम॥ सन्देहवद्विरोधोऽपि प्रामाण्यवशस्तमाह॥ विरुद्धाभासत्वं विरोधः
अर्थस्य विरुद्धस्येवाभासत्वं विरोधः। यथा पीतं पानमिदं त्वयाद्य दयिते मत्तोऽभवेदं मनाग्नाः पत्रालीनवकुङ्कुमेन रचिता रक्तांवर्धमानि
नितंवतुङ्गस्तनभारसम्भ्रमरगति गात्रे युमेवेपयुत्स नाथे तनुताममाचतिरहो मारस्य चित्रा गतिः। विरोधाद्विभावनाया भेदं दर्शयितु
माह क्रियाप्रतिषेधे प्रसिद्धतत्फलव्यक्तिर्विभावना॥ क्रियायाः प्रतिषेधस्तस्यामेव क्रियायाः फलस्य प्रसिद्धस्य व्यक्तिर्विभाव
ना। यथा॥ अप्यमुक्तानसंगत्येनवत्पत्येववेकृतम्। अक्षालितविशुद्धेषु तदपेक्षमनोभिरामम्॥ विरोधप्रसङ्गेनान्वयं दर्शयितु
माह॥ एकस्योपमेयत्वेऽपमानत्वे वान्वयः। एकस्यैवार्थस्योपमेयत्वमुपमानत्वं वान्वयः। यथा॥ रामरावणयोर्युद्धं रामरावणा

रायोरिवा॥ अनन्यस्ताद्दृश्यमेतेन प्रतिपद्यते॥ क्रमेणोपमेयोपमा॥ एकस्यैवार्थस्योपमेयत्वमुपमानत्वं यत्क्रमेण सोपमेयो
१७ पोपमा यः यथाः खमिव जलं जलमिव खं हंसश्च शशीव शशी हंस इव हंसः। कुमुदाकारास्ताराः ताराकाराणि कुमुदानि॥ उपमेयस्य परि
वृत्तिरित्येके॥ तन्निरासार्थमावृत्त्यर्थम्· साद्दृश्यादियमुत्पत्स्येति॥ (एतां) माह॥ समविसदृशाभ्यां परिवर्तनं परिवृत्तिः। समेन विसदृशेन
ग वार्थेनार्थस्य परिवर्तनं परिवृत्तिः। यथाः आदाय कर्णकिसलयमियमस्मादरुणाऽमनुचरणमर्पयति। उभयोः सदृशा विनिमयादन्यो
न्यमवञ्चितं मन्ये। विहाय साहारमहार्यनिश्चया विलोलदृष्टिः प्रविलुप्तचन्दना। ववन्ध बालारुणवभ्रुवल्कलं पयोधरोत्सेधविशीर्ण
संहति॥ उपमोपमानयोः क्रमेणाभिन्नेद्दिष्टिनिर्दिष्टितुमाह॥ उपमेयोपमानानां क्रमसंबन्धः क्रमः। उपमेयानामुपमानानां च उद्दिष्टानाम
नुद्दिष्टानां च क्रमेण संबन्धः क्रमः उपमेयानामुपमानानां च उद्दिष्टानामनुद्दिष्टानां च क्रमेण संबन्धः क्रमः। यथाः तस्याः प्रवृद्धलीलाभिराला
पस्मितदृष्टिभिः। जायन्ते वल्लकीकुन्दकुमुदेन्दीवरस्रजः। संबन्धप्रसङ्गेनैव दीपकं लक्षयितुमाह॥ उपमानोपमेयवाक्येष्वेका क्रिया दी
पकम्॥ उपमानवाक्ये उपमेयवाक्ये चैका क्रिया संबध्यमाना दीपकम्॥ तत्त्रिविधमादिमध्यान्तवाक्यवृत्तिभेदात्। तदाह त्रिविधं त्रिधा भ
वतिः आदिमध्यान्तवाक्यवृत्तिभेदात्॥ मध्यन्ते प्रमदवनानि बालपुष्पैः कामिन्यो मधुमदमांसलैर्विलासैः। ब्रह्माणः श्रुतिगतैः क्रिया
कलापैराज्ञानो विरलितवैरिभिः प्रतापैः। बाष्पः पथिककान्तानां जलं जलमुचां मुहुः। विगलन्मधुना दाक्षपात्रो घोगो महीभुजाम् राम॰
॥गुरुस्मृत्या बुद्धिमेधुगोष्ठ्यामनोभवः। उदयेन शशाङ्कस्य पयोराशिर्विवर्द्धते॥ दीपकवन्निदर्शनमपि संक्षिप्य माह॥ ।क्रिय ८

पैवस्वतदर्थान्वयख्यापनं निदर्शनम्॥ क्रिययैव विशुद्धपास्वस्यात्मनस्तदर्थस्य चान्वयस्य ख्यापने स्खलितहेतुदृष्टान्तविभा
गा[illegible]दर्शनं यथा॥ समुच्चयपदाध्यासः पतनायेत्यनुशालिनी संसृत। अपायाय पतति पत्रं तरोरिदं वमनग्रन्थेः। पततीति क्रिया तस्याः
स्वपतनतरदर्शीत्युच्चपदाध्यासस्तयोरन्वयः। समुच्चपदाध्यासः पतनायेति तस्य ख्यापनमनुशालिनी संसदिति॥ इदं च नार्था
न्तरन्यासः सत्यन्यथा प्रसक्तमाह॥ उक्तसिद्धैव वस्तुनोऽर्थान्तरस्यैव न्यसनमर्थान्तरन्यासः॥ उक्तसिद्धेरुक्तार्थस्य सिद्ध्यर्थं वस्तु
नो वाक्यस्यार्थान्तरस्यैव न्यसनमर्थान्तरन्यासः॥ वस्तुग्रहणात्सदार्थस्य हेतोर्न्यसनादर्थान्तरन्यासः। इह नातिदूरगोचरम
स्ति सरः कमलसौगन्ध्यादिति अर्थान्तरस्यैवेति वचनात्प्रावृत्तेनोक्तदिति। उदाहरणम्। प्रियेण संग्रथ्य विपक्षसन्निधावुपाहितां वक्ष
सि पीवरस्तनस्रजं न काचिद्विजहौ जलाविलां। वसन्ति हि प्रेम्णि गुणा न वस्तुनि॥ अर्थान्तरन्यासस्य हेतुत्वेन रूपत्वात्। हेतोश्चान्वयव्य
तिरेकात्मकत्वात्। न ततः पृथग्व्यतिरेक इति कश्चित्तन्निरासार्थमाह॥ उपमेयस्य गुणातिरिक्तत्वं व्यतिरेकः। उपमेयस्य गुणातिरि
क्तत्वं यद्दर्शितमुपमानात्स व्यतिरेकः। यथा॥ सत्यं हरिणशावाक्ष्याः प्रसन्नं सुभगं मुखम्। समानं शशिनः। किन्तु स कलङ्कविलम्बि
तः। कश्चिन्तु गमस्य गुणो व्यतिरेको यथा॥ कुवलयदलं प्रत्याख्यातं मधोर्मधुनिर्दितं हसितममृतं भग्नस्यादाः परं रसं संपदः।
विषमुपहतं चिन्ताव्याजे मनस्यपि कामिनीनां चतुरमधुरैर्लीलातन्त्रैस्तदक्षिविलोकितैः॥ व्यतिरेकादिशेषोक्तिभेदं दर्शयि
तुमाह॥ एकगुणहानिकल्पनायां शेषगुणविशेषोक्तिः॥ एकस्य गुणस्य हानेः कल्पनायां शेषे गुणे सामर्थ्यं यत्र तस्य विशेषोक्तिः।

१८ 18

रूपकं चेदं प्रायेणेति। यथा। भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः। घृतं विहितं नाम पुरुषस्य सिंहासनं राज्यम्। इयमकमला
लक्ष्मीर्हस्तीति जङ्गमं दुर्गम्। अत्रापि जङ्गमशब्दस्यापवादनिवृत्तिप्रतिपादनपरत्वादेकगुणहानिः कल्पनैवाप्येतेन वृत्त्याहिनाममन्त्रिम
हात्सवनिरुक्तिः। असनेहिनो मसोच्छ्रुसेमरणम्। अभिवृहस्पतिरित्येवमादिष्वेकगुणहानेः कल्पनामाख्याता॥ व्यतिरेकविशेषोक्तिभ्यां
व्याजस्तुतिर्भिन्नेति दर्शयितुमाह॥ संभाव्यविशिष्टकर्मकरणान्निन्दास्तोत्रार्थमाजस्तुतिः। अत्यन्तगुणाधिको विशिष्टस्तस्य कर्मत
स्य संभाव्यस्य करणान्निन्दाविशिष्टसाम्यापादनेन स्तोत्रार्थं व्याजस्तुतिः। यथा। ववभ्रसिन्धुं गिरिचक्रवाले विभेदसस्ते कशरेण ताला
न् एवंविधं कर्म तत्तानरामस्त्वया कृतं तन्न मुधैव गर्वः॥ व्याजस्तुतेर्व्याजोक्तिभिन्नत्वं दर्शयितुमाह व्याजस्य सत्यसारूप्यं व्याजोक्तिः
व्याजस्य छद्मनः सत्येन सारूप्यं व्याजोक्तिर्मायोक्तिर्माहुः। यथा। शरच्चन्द्रांशुगौरेण वाताविद्धेन भामिनि। काशपुष्पलवेनेदं सा
सुपातं मुखं कृतम्॥ व्याजस्तुतेः पृथक् तुल्ययोगितेत्याह॥ विशिष्टेन साम्यार्थमेककक्रियायोगस्तुल्ययोगिता॥ विशिष्टेन न्यूनस्य
साम्यार्थमेककालायाः क्रियाया योगः सा तुल्ययोगिताः। यथा। जलनिधिवसनामिमां धरित्रीं वहति भुजङ्गपतिर्भवद्भुजश्च॥ उप
मानाक्षेपस्याक्षेपः। उपमानस्याक्षेपः। प्रतिषेधः उपमानाक्षेपस्तुल्यकार्यार्थस्य नैरर्थक्यविवक्षायाः। यथा। तस्यास्तन्मुखमस्ति सौम्यसु
भगं किं पार्वणेनेन्दुना सौन्दर्यस्य पदं दृशौ यदि च ते किं नाम नीलोत्पलैः। किंवा कोमलकान्तिभिः किसलयैः सत्येव तत्राधरे ही धातुः पुन
रुक्तवस्तुरचनारम्भेष्वपूर्वो ग्रहः। उपमानस्याक्षेपः। आक्षेपः प्रतिपत्तिरित्यपि सत्रार्थः। यथा। ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रन राम॰ १८

खच्छताममाप्रसादयन्ती सकलङ्कमिन्दुं तापं परं वेरम्युधिकं च कारा। अत्र शरद्देश्येव इन्दुं नायकमिव रवेः प्रतिनायकस्येव। इत्युप
मानाभिगम्यन्ते इति तुल्ययोगितायाः सहोक्तेर्भेदं दर्शयितुमाह॥ वस्तुद्वयक्रिययोस्तुल्यकालयोरेकपदाभिधानं सहोक्तिः॥ वस्तुद्वयस्य क्रि
याकालयोरेकेन पदेनाभिधानं सहार्थशब्दसामर्थ्यात्सहोक्तिर्यथा· अस्तं भास्वान् प्रयातः सह रिपुभिरियं संह्रियन्तां बलानि॥ अत्रार्थयोर्न तु
विशिष्टत्वेन स्तुतिर्निन्दा तुल्ययोगितेति समाहितमेकमवशिष्यते। तल्लक्षणार्थमाह॥ यत्नादस्यत तत्सम्प्राप्तिः समाहितम्॥ यस्य वस्तुनः साधयि
उद्यते तस्य वस्तुनः सम्प्राप्तिः समाहितम्· यथा· तन्वी मेघजलार्द्रपल्लववता धौताधरे रश्रुभिः शून्येवाभरणैः स्वकालविरहाद्विश्रान्त
पुष्पोद्गमा। चिन्तामोहमिवाश्रिता मधुलिहां शब्दैर्विना लक्ष्यते चण्डी मामवधूय पादयतितं जातानुतापेव सा॥ अत्र पुरूरवसो ल
ताप्राप्तिर्वस्याः साद्दश्यं उत्तान्तस्यैव लतोर्वशीमप्यन्वेति॥ एतेऽर्थालङ्काराः शुद्धाभिमताः प्रायो गुणभूता इति विशिष्टानामलङ्काराणां
मिश्रत्वे संसृष्टिरित्याह॥ अलङ्कारस्यालङ्कारयोर्नित्वं संसृष्टिः। अलङ्कारस्यालङ्कारयोनित्वं यदसौ संसृष्टिः। संसृष्टिः संसर्गः सम्ब
न्ध इति॥ तद्द्वारानुपमारूपकोत्प्रेक्षावयवो। तस्याः संसृष्टेर्भेदाद्वानुपमारूपकमुत्प्रेक्षावयवश्चेति॥ उपमाजन्यं रूपकमुपमारूपकं य
था· निरवधि च निराश्रयं यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम्। प्रथम इह भवान्स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः
॥ एवं राजनिपुणपश्चिमलोधप्रतिलकदन्तिवमादयस्तदूदाहृत्या॥ उत्प्रेक्षाहितुत्प्रेक्षावयवः। उत्प्रेक्षायाहेतुरलङ्कारउत्प्रेक्षावयवः।
अवयवशब्दोत्थारमन्तं लक्षयति। यथा॥ अङ्गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः। कुड्मलीकृतसरोजलोचनं चुम्ब

१९ 19

तीवरजनीमुखंशशी॥ एभिर्निदर्शनैः स्वीयैः परकीयैश्च पुष्कलैः। बहुवैचित्र्यगर्भेयमुपमैव प्रपञ्चिता॥ आलङ्कारिकदेशायेतत् सौभाग्यभा
गिनः। तेऽप्यलङ्कारदेशीया योजनीयाः कवीश्वरैः॥ आलङ्कारि इति काव्यालङ्कारसूत्रवृत्तौ आलङ्कारिके चतुर्थेऽधिकरणे तृतीयोऽध्यायः॥
उपमाप्रपञ्चः समाप्तः आलङ्कारिकमधिकरणं चतुर्थमिति॥ सम्प्रति काव्यसमयं शब्दशुद्धिं च दर्शयितुं प्रायेण॥ एकं पदं न द्विः प्र
योज्यं प्रायेण बाहुल्येन किञ्चिदिवादिपदं द्विरपि प्रयोक्तव्यमिति दर्शयितुमाह॥ नित्यं संहितैकपदवत्पादेष्वर्द्धान्तवर्जम्॥ नित्यं संहिता
पादेषु. एकपदवत्. एकस्मिन्नेव पदे. तत्र नित्यासंहितेत्याम्नायः। यथा पाणिनिः। संहितैकपदे नित्या नित्या धातूपसर्गयोरिति॥ अर्द्धा
न्तवर्जम्. अर्द्धान्तं वर्जयित्वा॥ न पादान्तलघोर्गुरुत्वं च सर्वत्र॥ पादान्तलघोर्गुरुत्वं प्रयोक्तव्यमनर्द्धत्र न सर्वस्मिन्वृत्त इति। तासि
व पर्ववलिरूढपवाङ्कुरासु वीजाञ्जलिः पतति कीटमुखावलीढः॥ एवं प्रायेषु वृत्तेषु शिष्यत इति. ततः न पुनर्वरूथिनीनां रज
स्ति प्रसपीति समस्तमांसी द्विनिमीलितं जगत्। इत्यादिषु चकारोऽर्द्धान्तमित्यस्यानुकर्षणार्थः॥ न गद्ये समासप्रायं वृत्तमन्यत्रो
द्धतादिभ्यः समवादात्॥ गद्ये समासप्रायं वृत्तं न विधेयं शोभाभ्रंशात्। अन्यत्रोद्धतादिभ्यो विषमवृत्तेभ्यः समवादात्॥ पद्ये नत्र
न्त्रौ॥ न पादादौ खल्वादयः। पादादौ खल्वादयः शब्दा न प्रयोज्याः। आदिशब्दः प्रकारार्थः। येषामादौ प्रयोगो न श्लिष्यति. ते गृह्य
न्ते न पुनर्हन्तवत्प्रभृतयः। हन्त स्यार्द्धकचिदसमासं वाक्यम्॥ हन्त स्यार्द्धं किञ्चिदसमासं वाक्यं न प्रयोक्तव्यम्। यथा. जयति ता राम० १९
ए वेशान्तोर्मिमदङ्कुलिकोटयः। कराः क...स्य च भुजाखड्गाग्रकलिलतिषः॥ न कर्मधारयो बहुव्रीहिप्रतिपत्तिकरो न प्रयोक्त

वः। यथा॰ वीराः पुरुषा यस्य स वीरपुरुषः कलो रवो यस्य स कलरव इति॥ संभाव्यनिषेधपरिवर्त्तने द्वौ प्रतिषेधौ॥ संभाव्यनिषेध
स्य निवर्त्तने द्वौ प्रतिषेधौ वक्तव्यौ। यथा समरमूर्द्धनि नेद्वौ प्रतिषेधौ॥ संभाव्यनिषेधस्य निवर्त्तने द्वौ प्रतिषेधौ वक्तव्यौ। यथा॰ समरमूर्द्धनि येन
यशस्विना न न जितो विजयी त्रिदशेश्वरः। स एव तु तापसवाणपरम्पराकवलितस्ततजः क्षितिमाश्रितः। विशेषणमात्रप्रयोगो विशे
ष्यप्रतिपत्तौ॥ विशेष्यस्य प्रतिपत्तौ जातायां विशेषणस्यैव प्रयोगः यथा॰ निधानगर्भामिव सागराम्बराम्॥ अत्र हि पृथिव्या विशेष
णमात्रे प्रयुक्तम्। एतेन कुन्दस्यैतस्यापि पुरपुरारे ललाटपट्टादुद्गादुदर्चिः। गिरिस्तडित्वानित्यादयः प्रयोगा व्याख्याताः॥ स
र्वनाम्नानुसन्धिर्वृत्तिच्छन्नस्य। सर्वनाम्नानुसन्धिरनुसन्धानं प्रत्यवमर्षः कार्यः। वृत्तिच्छन्नस्य वृत्तौ समासे गुणीभूतस्य॰ यथा॰ प्रवातनीलो
त्पलपत्रचक्षुषो मुखस्य तद्रेणुसमानगन्धिन इति॥ संबद्धसंबन्धेऽपि षष्ठी क्वचित्॥ संबद्धेन संबन्धः संबद्धसंबन्धस्तस्मिन् षष्ठी प्रयो
ज्या क्वचिन्न सर्वत्रेति॰ यथा॰ कमलस्य कन्द इति॰ कमलेन सम्बद्धा नलिनी तस्याः कन्द इति संबद्धसम्बन्धः। तेन कदलीकाण्डादयो
व्याख्याताः॥ अतिप्रयुक्तं देशभाषापदम्॥ अतीव प्रयुक्तं कविभिर्देशभाषापदं प्रयोज्यम्। यथा॰ पोविदित्यमिल लावनहालाम्।
अत्र हालेति॥ अनतिप्रयुक्तं न प्रयोक्तव्यम्॥ यथा॰ कङ्कोल्लीकाननालीरविरलविलसत्पल्लवानन्दयन्तश्चात्र कङ्कोल्लीपदम्॥
लिङ्गाध्याहारौ॥ लिङ्गस्याध्याहारश्चेति लिङ्गाध्याहारौ अतिप्रयुक्तौ प्रयोज्याविति॰ लिङ्गं यथा॰ वत्से मा बहु निश्वसीः कुरु सुरागरा
गमेकं शनैः। अत्र गराङ्गशब्दः पुंसि प्रयुक्तो न स्त्रियामाम्नातोऽपि स्त्रीत्वे॥ अध्याहारो यथा॰ मा भवन्तमनलः पवनो वा वारणो

२०

मदकलःपुरस्तुर्वीःवज्रमिन्द्रकरविप्रसृतंवास्वस्तितिसुललितयासहरक्ष॥ अत्रहिअधाक्षीदित्यादीनांक्रियापदानामध्याहारोऽन्वय
प्रयुक्तइति॥ लक्षणाशब्दाः॥ लक्षणाशब्दाश्चातिप्रयुक्ताःप्रयोज्याः। यथाद्विरेफरथचरणशब्दौ भ्रमरचक्रवाकार्थौ॥ अनतिप्रयुक्तास्तु
नप्रयोज्याः। यथाः द्विकः काकइति॥ ननुद्वाहुल्यगोकत्रेतेपीलक्षणाशब्दानांनवोहुत्यमेकस्मिन्वाक्येप्रयोक्तव्यमशक्यो नत्वेकस्यावा
ञ्चकस्यवाचकत्वज्ञानःकर्तुंनवद्रूनामिति॥ स्तनादीनांद्वित्वविशिष्टाजातिःप्रायेण॥ स्तनादीनांद्वित्वविशिष्टाजातिःप्रायेणवाह
ल्येन। यथा स्तनयोस्तरुणीजनस्येति। प्रायेणेतिवचनात्क्वचिन्नभवति। स्त्रीणांचक्षुरिति। अथकथंद्वित्वविशिष्टत्वेजातेः। तद्वि
त्वेनजातस्वतद्रूपत्वात्तस्याः। नदोषमनुवादिनः। नचैवमातिप्रसङ्गोलक्ष्यानुसारित्वान्न्यायस्य। इत्येवमन्यापिमवस्थाप्यत्या॥ ॥
इतिकाव्यालङ्कारवृत्तौप्रायोगिकेपञ्चमेऽधिकरणेप्रथमोऽध्यायः॥ काव्यसमयःसांप्रतंशब्दशुद्धिरुच्यतेइत्याह॥ रुद्रावित्ये
कशेषोऽन्वेष्यः॥ रुद्रावित्यत्रप्रयोगेएकशेषोऽन्वेष्योऽन्वेषणीयः। रुद्रश्चरुद्राणीचेतिपुमान्स्त्रियेत्येकशेषः। सचनप्राप्नोतिति
। तल्लक्षणश्चेदेवविशेषइत्यनुवर्तत इति तत्रैवकारकरणात्स्त्रीपुंस्कृतएवविशेषोभवतीतिमवस्थितम्। अत्रत्तुपुंयो
गादाख्यापिकायामितिविशेषानस्तिरमस्तीति। एतेनइन्द्रोभवौइन्द्रावित्यादिप्रयोगाःप्रयुक्ताः। मिलिक्लविक्षुपिप्रभृतीनांधातुत्वे
धातुगणस्यासमाप्तेः। मिलतिःक्लवते। क्ष्णुपतीत्यादयःप्रयोगाः। तत्रमिलिक्लविक्षुपिप्रभृतीनांकथंधातुत्वम्। गणपाठेगणाय राम०
ठितानामेवधातुसंज्ञाविधानात्। आहधातुगणस्यासमाप्तेः। वइति धातुगण इति शब्दविदआचक्षते। तेनेयांगणपाठोऽनुमितः। २०

शिष्टप्रयोगादिति॥ वलेरात्मनेपदमनित्यं ज्ञापनात्॥ व तत्कथमाह ज्ञापकात्। किं पुनस्तज्ज्ञापकं वक्ष्यति हिस्वनुवर्धकराणां च स्विड-
दृकारेणोदात्तानुदात्तेन सिद्धमात्मनेपदं किमर्थो ङित्करणम् तत्क्रियतेऽनुदात्तानिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनार्थमिति। एतेन वि-
दिमार्षित्तर्जिप्रभृतयो व्याख्याताः। आवेदयति। भर्त्सयति। तर्जयति। इत्यादीनां प्रयोगानां दर्शनादत्रापि अनुदात्तनिबन्धनमनित्यत्वं ज्ञाप-
केन द्रष्टव्यमिति॥ स्त्रीयत इति कर्मकर्तरि॥ स्त्रीयत इति प्रयोगो दृश्यते। स कर्मकर्तरि द्रष्टव्यः स्त्रीयतेरात्मनेपदित्वात्॥ खिद्यत इति च प्र-
योगो दृश्यते। सोऽपि कर्मकर्तर्येव द्रष्टव्यः। न कर्तरि दैवादिकत्वात् खिद दैन्ये॥ मार्ष्टेरात्मनेपदमलक्ष्यम्॥ चुरादौ मार्ग अन्वेषण इति पठ्य-
ते। आपपाद्धेति विकल्पितत्वाच्च। तस्मादात्मनेपदं दृश्यते। मार्ग्जनीदेहमारमिति। तदलक्ष्यम्। अलक्षणा मपस्कोसी॥ लोलमानादयश्चा-
नशि॥ लोलमाना वेल्लमाना वयस्यप्रयोगाश्चानशि द्रष्टव्याः। शानच् स्वभावः परस्मैपदिभ्यो ह्यागतानामिति। लभेर्गत्यर्थाद्युत्पत्तित्वात्। णिच्च
तोऽकर्तुः कर्मत्वाकर्मत्वम् अस्युपलभिप्राप्युपसर्गो नाङ्गतिमाह अस्ति रात्युपसर्गो नाप्रोसि माह॥ तत्रेति पर्यवस्मिन्नात्यर्थत्वाल्ल-
भेर्णिच्यणौ यः कर्त्ता तस्य गत्यादिसूत्रेणाकर्मसंज्ञा। यथा। दीर्घिकासु कुमुदानि विकासं लम्भितः। यति शिशिरांशुभासः। द्वितीयप-
क्षे गत्यर्थत्वाल्लभेर्णिच्यणौ कर्तुर्नकर्मसंज्ञा॥ यथा। क्षितिसिति म्यासु तराबा पुष्मुने र्विसारिभिः सौधमिवा यल लम्भयना। द्विजावली
बालनिशाकरांशुभिः शुचिस्मिता वाचमवोचदच्युतः॥ तेमेद्वावेव निपाते षु॥ त्वया मया इत्यस्मिन्नर्थे तेमे शब्दौ निपातेषु द्रष्टव्यौ। यथा। श्रु-
तं ते वचनं तस्य वेदानधीत इति। नाधिगतः पुरा मे इति॥ तिरस्कृत इति परिभूतेऽनाच्छुप चारात्॥ तिरस्कृत इति शब्दः परिभूते दृश्यते। सा-

२१ ज्ञातिरस्कृत इति स च न प्राप्नोति। तिरःशब्दस्यान्तर्द्धाविति॥ अन्तर्द्धौ गतिसंज्ञा तस्मात् सत्यां तिरसोऽन्यतरस्यामिति सकारः। तत्कथं तिरस्कृत इति
21 परिभवे। आह अन्तर्द्ध्युपचारात् परिभवोऽपि हि अन्तर्द्धिर्भवति मुख्यस्तु प्रयोगो लावण्यप्रसरतिरस्कृताङ्गलेखमिति॥ नैकशब्दः सुप्सुपास-
मासात्॥ अरण्यानां स्यान्नैकफलनमिति नैकद्रुममित्यादिषु नैकशब्दो दृश्यते सच न सिध्यति नञ्समासे त्वनेकमिति रूपं स्यात्॥ निरनुब-
न्धस्य नञ्शब्दस्य समासलक्षणं नास्ति॥ तत्कथं नैकशब्दः। आह सुप्सुपेति समासात्॥ मधुपिपासुप्रभृतीनां समासो गमिगाम्यादिपाठात्॥
मधुपिपासुमधुव्रतसेवितं मुकुलजालमरुध्यत वीरुधाम्। समासो गमिगाम्यादिपाठात्॥ मधुपिपासुमधुव्रतसेवितं मुकुलजालमरुध्यत
वीरुधाम्। इत्यादिषु मधुपिपासुप्रभृतीनां पाठात्॥ सिताद्विषु गमिगाम्यादीनामुपसंख्यानमिति हि द्वितीयासमासलक्षणं दर्शयि-
ति त्रिवलीशब्दः सिद्धः संज्ञा चेत्॥ त्रिवलीत्ययं शब्दः सिद्धः संज्ञा यदि॥ दिक्संख्ये संज्ञायामेव समासविधानात्॥ बिम्बाधर इति हन्तोम-
ध्यपदलोपिन्यायात्॥ बिम्बाधरः पीयते इति प्रयोगो दृश्यते सच न युक्तः। अधरत्वमिति भवितव्यम्। उपमितं व्याघ्रादिभिरिति समासः स्यात्। तत्कथं बि-
म्बाधर इति। आह उष्ट्रमुखवन्मध्यपदलोपिन्यायात् शाकपार्थिवादित्वात् समासे मध्यपदलोपिनि सति। बिम्बाकारोऽधरो बिम्बाधर इति। तेन बिम्बोष्ठशब्द उ-
ष्ठशब्दो व्याख्यातः अत्रापि पर्वहृद्वृत्तिः॥ शिष्टप्रयोगेषु चैवंविधिस्तेन नातिप्रसङ्गः॥ आमलकलोलादिषु द्वन्द्विविसर्गपदवत्॥ आमलकलोलमामल-
सरलमित्यादिषु द्वन्द्विविसर्गपदवत्। सपरक्षस्त्वकादित्वात्॥ न धान्यषष्ठादिषु षष्ठीसमासप्रतिषेधः पूरणेनान्यतद्धितान्तत्वात्॥ धान्य- राम•
षष्ठः। उञ्छषष्ठाङ्कितसैकतानीत्यादिषु न षष्ठीसमासप्रतिषेधः। पूरणेन पूरणप्रत्ययान्तेनान्यतद्धितान्तत्वात्। षष्ठो भागः षष्ठ इति पूरणाद्भा- २१
गेषेधः। पूरणेन पूरणप्रत्ययान्तेनान्यतद्धितान्तत्वात्। षष्ठो भागः षष्ठ इति पूरणाद्भागे तीयादन्। षष्ठाष्टमाभ्यां ञ चेति ञविधानात्। न पूरणः

॥पत्रपीतिमादि ष्णुगुणवचनेन॥ पञ्चमीतिमापस्या लीपिङ्गलिम्न इत्यादिषु षष्ठीसमासप्रतिषेधो गुणवचनेन प्राप्तः। बालिश्यांतु नकृ
तः॥ अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः। अवर्ज्यो ऽवर्ज्जनीयो व्यधिकरणो बहुव्रीहिर्जन्माद्युत्तरपदं यस्य स जन्माद्युत्तरपदः।
यथाः शास्त्रार्थजन्मा हि विवेकलाभः। करोत्पत्तयः प्राणा इति॥ हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्॥ हस्ताग्रमग्रहस्तम्। पुष्पा
ग्रमग्रपुष्पम् इत्यादयः प्रयोगाः। कथम्। आहिताग्न्यादिषु पाठात्। पाठे वा तदनियमः स्यात्। आ हगुणिनोर्भेदाभेदाभ्यां तत्र भेदात् हस्ता
ग्रादयः। अभेदादग्रहस्तादयः॥ लक्षणप्रवृत्तिनिपातापभ्रंशो रक्ष्यः। काष्ठतराम् तराकाष्ठमिति। पदघ्यापर्वनिपातेकुर्वन्तीति तत्रापि
भ्रंशो रक्ष्यः। अनित्यत्वज्ञापनत्वं सर्वविषयमिति॥ निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात्॥ अनभिहित
इति सूत्रे तिङ्कृत्तद्धितसमासैरिति परिगणनं कृतं तस्य प्रायिकत्वात्। निपातेनाप्यभिहिते कर्मणि कर्मविभक्तिर्न भवतीति यथा। विषवृ
क्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्। परिगतं मख इति मन्यते शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्येनोपक्रमात्।
शकेः शकिसहोश्चेति कर्मणि शक्यपि कृते शक्यमिति रूपं भवति। विलिङ्गवचनस्यापि विरूढ्विलिङ्गवचनस्यापि कर्माभिधायां कर्माभि
धाने समान्योपक्रमात् विशेषानपेक्षमिति। यथा शाक्यमोघविपत्तेर्न वोढ्याः करणिप्रत्ययच न लभते तेन। अप्रयत्नपवस चिकोमलाछेत्तुमग्र
करसंपुटैः कराः। अत्र भाष्यकृद्द्वनमस्य यथा। दाकंबुश्वमीसादिभिः स्तुत्रातिकर्तुमिति। नचैकाकिनं सामान्योपक्रमः। तेन शक्या भङ्गभ
दि तिविश्लिनीकन्दवत्रेन्द्रपादादृश्यपि भवति॥ हानिवदाधिक्यमप्यङ्गानां विकारः। येनाङ्गविकार इति सूत्रे यथाङ्गानीहामि स्तनाधिकोम

२२ पिविकारः। यथा- अक्षणकारणइति भवति। तथा मखेन मल्लकरणं मन्यन्ते। अत्र तु रूमिकीदानामिति प्रयोगो न युक्तः। रुदुद्रेकन्तव इत्येकव
द्भावप्रसङ्गात्। न च मध्यपदलोपी समासो युक्तस्तस्यासर्वविषयत्वात्। नरवणेऽङ्गुष्ठुखरमिति पाठात्। खरोष्ठौ वाहनं येषामित्यत्र खरो
ष्ठाविति प्रयोगो न युक्तः। गवाश्वप्रभृतिषु खरमिति पाठात्॥ आसेत्यसनेः। ल्यवरापुत्याघइवासपत्रैः इत्यसतेर्भोतो रस्सगतिदीमादा
22 नेष्विति प्रयोगो नास्तभिभावप्रसङ्गात्॥ युध्येदिति पर्वः कचित्॥ यो भनरीपिरण्ड स्म हन्मेन युध्येदिति प्रयोगः स चायुक्तः। युधेरात्मनेपदित्वात्। न
कथं युध्येदित्याह- युधः कचिपु वभिच्छुत्यात्मने युध्यादिति॥ विरलापमानादिषु कण्डूरूप्यः॥ विरलायमानो मलयमारुत इत्यादिषु
कण्डूरूप्यः। भ्रमणादिपाठात्। नापिप्यकूलोहितादिपाठात्॥ अहेतो हन्तेर्णि चुरादिपाठात्॥ घातयित्वा दशास्यमिति। अहेतौ हन्तेर्णि
वदप्युते। स कथं चुरादिपाठात्। चुरादिषु हन्त्यर्थाश्चेति पाठात्। अनुचरी चरेष्टित्वात्। अनुचराप्रियमिति मदालसामित्यत्र अनुव
र्तिनि न युक्तः। ङीकाराभावात्। कथमयं प्रयोगः आह चरेष्टित्वात्। पचादिषु चरडिति हि पठ्यत इति॥ केशरालमित्यलतेर्णिः॥ केशराली
शिलीं ध्रमित्यत्र केशरालमिति कथमाह। अलतेरणि। अलंभ्रमणपर्याप्रिवारणेष्विति। अस्मात्पर्याप्त्यर्थात् केशरशब्दे कर्मण्युपपदे क
र्मण्युपरित्युने नारीसति केशरालमिति सिद्धम्॥ पत्रलमिति लातेः के॥ पत्रलवनमिदं विराजते- इत्यत्र पत्रलमिति कथमाह। लातेः
केऽलादानरत्यस्माद्धातोरादानार्थात्। पत्रशब्दे कर्मण्युपपदे आतोनुपसर्गात्क इति कप्रत्यये सति॥ महीध्रादयो मूलविभुजादिदर्शना राम॰
दिति। महीध्रधरणीध्र इत्यादयः। प्रयोगा मूलविभुजादिदर्शनात्। कप्रत्यये सतीति महीं धरतीति महीध्रः। एवमन्येपि द्रष्टव्याः। व्रला २२

दिषु हन्तेर्नियमादरिहाद्यसिद्धिः। ब्रह्मादिषूपपदेषु हन्तेः क्विब्विधौ॥ ब्रह्मभ्रूणवृत्रेष्विति· अरिहा रिपुहा इत्येवमादीनां सिद्धिः। नियमात्।
ब्रह्मादिष्वेव हन्तेरिति। चतुर्विधश्चात्र नियम इति। नियमानां विषयो निरूप्यत इति॥ ब्रह्मविदादयः छन्दस्येव स्यात्। ब्रह्मवित्· हजभिदित्या
दयः प्रयोगा न युक्ताः। ब्रह्मादिषु हन्तेरेव नियमात्। आह· छन्दस्येव स्यात्· वेत्तीति वित्· भिनत्तीति· पित्तच्छिदेति क्विप्। ततः करणैर्विदादिभिः ब्र
ह्मादीनां समासः। तैर्महीधरादयो व्याख्याः। ते ब्रह्मादिभिर्महीधरादयो व्याख्याताः। धरतीति चरः। एवं गाङ्गधकीहादयो द्रष्टव्याः॥ भिदुरादयः क
र्मकर्त्तरि कर्तरि च॥ भिदुरं काष्ठमिति भिरं भिदुरं व्योमनः श्च्छिदुरमिति। छिदुरातपो दिवसः। मत्सरभिदुरं प्रेम। भङ्गुरा प्रीतिः। अनङ्गं नाम भङ्गुरमिति
प्रयोगो दृश्यते॥ तत्कथमाह· कर्मकर्तरि कर्तरि च· कर्मकर्तरि चायमिष्यत इत्यत्र चकारः कर्तरि चेत्यस्य समुच्चयार्थः। गुणविस्तारादयश्चिन्त्याः। गुणा
विस्तरो व्याख्येयः विस्तर इत्यादयः प्रयोगाश्चिन्त्याः। प्रथने वावशब्द इति वज्रप्रसङ्गात् अवतरावचयपथ्यद्यौ दीर्घश्चेत्यस्यासो बालानाम। अव
वतरशब्दस्यावचयशब्दस्य दीर्घत्वमत्यासो बालानां नालिणना प्रयोगेष्विति तेहि अवतर अवतार इति प्रयुक्तते। मारुतावतार इति। सनेयु
कोभावेतरेतरविधानात्। अवचाय अवचय इति प्रयुज्यते· पुष्पावचय इत्यत्र हेलादाने वेरस्तेये इति वज्रप्रायत्न इति॥ शोभेति निपातनात्।
शोभेत्यपशब्दः साधुर्निपातनात्· शुभमशुभं शोभार्थ इति· शुभे भिदादेराकृतिगणत्वादङ् सिद्धाख्य· गुणप्रतिषेधाभावश्च निपात्यते। शोभा
र्थीवित्यत्रैकशब्दः किं शोभाः आहोस्वित्· शोभ इति विशेषावगतिराचार्यपरिचर्योपदेशादिति॥ अविशेषो गुणः स्त्रियां बहुलं विवक्षाः। अवि
धावकारविधानेन गुणोऽस्य बहुल इति स्त्रियां बहुलं विवक्षाः क्वचिद्द्विवक्षा क्वचिदविवक्षा क्वचिदुभयमिति विवक्षा। यथा हाहालत्रोति। तत्क्रि

२३

इति। विवक्षाविवक्षे यथा। बाधा बाधः। ऊहा ऊहः। क्रीडा क्रीडः इति॥ व्यवसितादिषु कर्तरि क्तः खकारात्॥ व्यवसित प्रतिपन्न इत्यादिषु भावकर्मवि
हितोपि क्तः कर्तरि गत्यर्थादिसूत्रेण चकारस्यानुक्तसमुच्चयार्थत्वात्। भावकर्मानुकर्षणार्थत्वे चकारस्येति चेत्। आहृतिः कर्तर्यपि॥ आहेति भूतेऽ
लन्तभ्रमात्॥ ब्रुवो लटि ब्रुवः पञ्चानामित्यादिना आहेति णलादितः। स भूते प्रयुक्ते इत्याह। भगवान्मुनिरिति। अन्यस्य भूतकालाभि
धायिनो णलन्तस्य लिटि भ्रमात्। त्रिपुरास्त्वेवं प्रयुञ्जते। प्राह स स्मितमधुमज्जन्दस्य गिरमिति। अनुकरोति भगवतो नारायणस्ये
त्यत्रापि मन्ये स्म शब्दः कार्वना प्रयुज्यते। लेखकैस्तु न लिखित इति॥ ॥शारलादिभ्यः स्त्रियां टापो प्राप्तिः॥ उपशोतः अस्तु स्थिरम
हिषगोव हुशारलाः शक्त्रीनां ज्ञाताः प्रमुदितविहंगास्तरभुवः। भ्रमरोत्करकल्पाः। कुसुमानि समृद्धयः। इत्यादिषु स्त्रियां श
रलादिभ्यः टापो प्राप्तिः। अन्यतो ङीषिति ङीषि विधानात्॥ प्राप्तिनि नीलेति चिन्त्यम्॥ कुवलयदलनीलाः कोकिलावालचूत इत्या
दिषु नीलेति चिन्त्यम्। कोकिला नीलेति न भवति। अमा नीलपदाज्जानपदादिसूत्रेण प्राप्तिनि चेति ङीष् विधानात्॥ मनुष्यजा
तेर्विवक्षाविवक्षे। इतो मनुष्यजातेरूङ् इत्यत्र मनुष्यजातेर्विवक्षार्थान। मन्दरस्य मदिराक्षिया श्वश्र्वो निम्ननाभिनभवति निम्नगाः
पाश्ववासुकिविकर्षितोद्भवा भाविनी हपदवीविभाव्यते॥ अत्र मनुष्यजातेर्विवक्षायामितो मनुष्यजातेरिति ङीपि सति अस्वार्थनयोर्हृ
स्वइति ह्रस्वत्वं सिध्यति। नाभिशब्दात्तु न इतश्च प्राप्यमपि ङ्या दीकारिकृते नाभीति स्यात्। इतो परो गैर्णयनो दविन्दुमिर्निभय नाभेर्निपतदि
रङ्किताः। अत्र निम्नयना भोरिति मनुष्यजातेरविवक्षेति ङीयन कृतः। सुतनु जहिहि कोपं पश्य पादानतं मामित्यत्र मनुष्यजातेर्वि राम. २३

वक्षेति॰ सुतशब्दाद्‌ऊङ् भवतः। ओङि॰ सति पूर्ववद्ध्रस्वत्वे च सुतनुशब्दः सिध्यति। वरतनुरयं वासौ नैव दृश्यावयामेद्दृत्यत्र मनुजतिरवि
वक्षेत्यूङ्॰ न कृतः। उकारान्ताद्‌प्यूङ्‌दृष्टेः। उतऊङ् विहित उकारान्तादपि क्वचिद्भवति। आचार्यस्य प्रवृत्तेः। कासौ प्रवृत्तिः। अप्राणिजातेश्चा
रज्ज्वादीनामिति॰ अलाबूः। कर्कन्धूरित्युदाहरणमतेन सुमुसंभोराः। अत्र सुभ्रूशब्दादूङ् सिद्धो भवति॰ ऊङि॰ सति सुभ्रूरिति स्यात्॥ कार्त्तिकीप
दृति ठज्ज्रुधरकार्त्तिकीयो नमस्वानिति ठज्ज्रुधरः॥ अत्रं कालाङ्कुजिति ठज्ज्रुधरः। ठज्ज्रम वनदुः खेन प्रियनदृति॥ शार्वरमिति च॥ शार्वरं तम इति॥ अ
त्र कालाङ्कुजिति ठज्ज्रुधरः॥ शाश्वतमिति प्रयुक्तेः। शाश्वतं ज्योतिरित्यत्र शश्वत्तमिति न सिध्यति। कालाङ्कुजिति ठञ्‌प्रसङ्गात्। येषां च विरोधः
शाश्वतमिति॥ राजवंश्यादयः साधवः॥ राजवंश्यः॰ सूर्यवंश्यः इत्यादयः शब्दास्तत्र साधाविति यत्ने न साधावर्थे यप्रत्यये सति साधवो भव
न्ति॰ भवार्थे पुनर्दिगादिपाठे पि वंशशब्दान्न यत्प्रत्ययस्तदन्तविधेः प्रतिषेधात्॥ दारवशब्दो दुःप्रयुक्तः। दारवं पात्रमित्यादिषु दारवशब्दो यो
मयद्विधीयते। अत्र तु दा[illegible]शाद्दमिति विवक्षायां दारवमिति भविष्यति। नैवमिति स्यात्। हृद्धूठइति विधानात्॥ अणिमादिभ्य इम
निजम् ग्गृग्यः अणिमा॰ प्रोढिमा॰ इत्यादिषु इमनिच् मृग्यान्वेषणीयः। अयमादयश्च वा न वे न्यावत्॥ अपप्रसान्निध्यमित्यादयश्चात
र्यन्यवत्स्वार्थिकः। पंचतः। पंचषित्करणादीकारे बहुलम्॥ गुणवचने ब्राह्मणादिभ्यः पंचतस्यापि त्करणादीकारो भवति। बहुलम्। ब्राह्म
णादिषु न भवति॥ सामग्र्यमित्यादिषु विकल्पेन॥ सामग्र्यम्॰ सामग्री॰ वैदग्ध्यम्॰ वैदग्धी॥ धन्वीति श्रीत्यादिपाठात्॥ श्रीत्यादिषु धन्व
नेशब्दस्य पाठात्॰ धन्वीति॰ इनौ सति सिद्धो भवति॥ चतुरस्रशोभीतिशिनो॥ वभवतस्यां चतुरस्रशोभिवत्पूर्वे भक्तं नव योव नेने

त्रचतुरस्त्रशोभीति न प्रयुक्तः श्रीत्यादौ शोभाशब्दस्य पाठेपि णिनिर्न सिध्यति॥ ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्स्यादेतावत
२५ दन्तविधिः। तथापि कर्मधारयान्मत्वर्थीयानुपपत्तिर्लघु। स्वत्वात्प्रक्रमस्येति बहुव्रीहिणा भवितव्यम्। मत्वर्थीयस्याप्राप्तिस्तत्कथम्। च
तुरस्त्रशोभीति कथम्॰ न त्वत्र पर्ववद्वृत्तिरिह शक्या कर्तुमिति। शुभेः साधुकारित्वावश्यके णिनिं कृत्वा तदन्ताच्च भावप्रत्ययं
कृत्वा पश्चाद्बहुव्रीहिः कर्तव्यः। अनुमेयं शोभित्वं यस्येति भावप्रत्ययस्तु गतार्थत्वान्न प्रयुक्तः। यथा निराकुलं तपति धीरमुवाचेति॥
किञ्चुकीयाइति क्वचित्॥ श्रीवत्ति राजमहिषीमनुकञ्चुकीयाइत्यत्र कञ्चुकीयाइति कथं मत्वर्थीयस्यैव प्रत्ययस्याभावात्। आह॰ काचित्क
सत्यपेसति कञ्चुकीयाइति भवति। कञ्चुके आत्मानमिच्छतीति कञ्चुकीयाइतिः वोढुप्रतियोग्यपेक्षायामप्यातिशायनिकाः बोद्धस्य प्रति
योगिनोपेक्षायामातिशायनिकाः। तमबादयो भवन्तीति वनतरं तमः बहुतरं प्रेमेति॥ कौशिलादयः पदलक्षणविवर्णलोपात्॥ कौशिलवा
शिलइत्यादयः कथम्॰ कौशिकान्नीतावनकम्पायावलिलवैवेतिइत्ल विहूत। धान्नाद्वन्द्वमिति वर्णलोपात्सिध्यति॥ मौक्तिकमिति विनपा
दिपाठात्। मुक्तेवमौक्तिकं विनयादिपाठादृष्टव्यम्। स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्त इति नपुंसकत्वम्॥ प्रातिभादयः प्र
ज्ञादिषु॥ प्रातिभादयः शब्दाः प्रज्ञादिषु द्रष्टव्याः। प्रातिभादिकृतद्वितादिभ्यः शब्देभ्यः प्रज्ञादिपाठाद्दर्शितः स्वार्थिके कृते प्रातिभं वैकृतं
द्वैतमित्यादयः प्रयोगाः सिध्यन्ति॥ न सहजसमितिसमयीभावे॥ मधुसहजसंसमेपदम्पिबन्ति शिलीमुखाः। इत्यादिषु सहजसमितिनपु राम॰
क्रमः॰ अनव्ययीभावएव सहजसहशब्दस्येष्टत्वात्॥ नचतवनुवीत्यसंज्ञायाम्॥ धतचनुत्ति॰ शौर्यशालिनि। अचनुवीप्सेत्यसंज्ञायानपु २५

कः। षत्पुरुषश्चेत्तन ह्रस्वविधानात्। संज्ञायांतु नो विकल्पो नासंज्ञायामिति॥ दुर्गन्धिप इति दुर्लभः। दुर्गन्धिः कापईत्यादिषु दुर्गन्धिपद इति समासा
न्तो दुर्लभः। डत्यत्यादिषु दुःशब्दस्य पाठात्॥ सुदत्यादयः प्रतिविधेयाः। सादक्षरो कोत्सुदती समजेति। शिखरद इति पति तरस नेत्यादिषु सुदत्या
दयः शब्दाः प्रतिविधेयाः दन्तादेशलक्षणाभावात्। अत्र प्रतिविधानमखदन्तादिषु सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात्। सुदत्यादिषु दन्ता
देशः दृष्टस्येके। अन्ये तु वर्णयन्ति। सुदत्यादयः संज्ञाभिधापि नो योगरूढिशब्दास्ते पुंस्त्रियां संज्ञायामिति दन्तादेशो विकल्पेन सिद्ध एवेति। घृत
दृढोरसहत्युक्तनकपः। तदन्तविधेः प्रतिषेधात्। शिवकुं नञ्को टिभिः घृतदृढोरसोरः सप्तादइति- दृढोरसह इत्यत्र गरः प्रभृतिभ्यः कप्न स्रतो
ग्रहणावतात् प्रातिपदिके नेति तदन्तविधेः प्रतिषेधात्। वाक्ये त्विवं कर्तव्यम्। घृतदृढोरोपेक्षामिति॥ अवे हि श्रुति हृ हिरव घायुरा एव प्रयु
क्तः॥ अपांगनेत्रेति लुगलभ्यः॥ अपांगनेत्रे यस्याः सापांगनेत्राइत्यत्र लुगलभ्यः। अमर्द्धमस्तकात्स्वांगादकामइति सम्भ्यान्न
लुग्विधानात्। नेष्टाः स्त्रिलघुप्रियादयः पुंवद्भावप्रतिषेधात्॥ स्त्रिलघुप्रियाः दृढकान्तादयो नेष्टाः। स्त्रियाः पुंवदिति पुंवद्भावस्य
प्रियादिषु निषेधात्। दृढभक्तिरसो सर्वत्रेति मत्र पूर्वपदस्य स्त्रियां विवक्षितत्वात्॥ जलजम्बुलतादयो ह्रस्वविधिः। जलजम्बुलताविल
सवन्ति। अन्ये कर्कन्धुग्रहणमित्यादिषु कथं जलजम्बुलतादयः। आह। ह्रस्वविधिः। इको ह्रस्वोऽङ्यो गालवस्येति ह्रस्वविधानात्॥ तिलकाद
योऽजिरादिषु॥ तिलकादयः शब्दाः अजिरादिषु द्रष्टव्याः। अनुयाति लकवती कनकवतीत्यादिनु मनुपि मतौ वह चोऽजिरादी
नामिति दीर्घत्वे स्यात्। केचित्तु वर्णयन्ति। नयो मतुविति। यो मतुप् तत्रायं विधिरिति। येषां मते नामरावतीत्यस्य सिद्धिरिति॥ ॥

२५ निशम्यनिशमय्यशब्दौ प्रकृतिभेदात्॥ निशम्य निशमय्य इत्येतौ शब्दौ त्वेतस्मिन्नर्थे· अत्र शमेर्ल्यपि लघुपूर्वादित्ययमादेशे सति।
निशमय्येति भवितव्यम्। न निशम्येति· आह· प्रकृतिभेदात्। शमादेर्वा दिके स्येति निशम्येति रूपम्। शमोऽदर्शन इति चुरादौ निचि
मित्संज्ञकस्य निशमय्येति रूपम्॥ संयम्य नियम्य शब्दाववशौ कृतत्वात्॥ कथं संयम्य नियम्य शब्दौ ल्यपि लघुपूर्वादिति ने रयादेशेन
भवितव्यम्। आह· अनिर्जतत्वाद्धातोर्णिचि न कृतोगतार्थत्वात्। यथा वातिनियच्छतीति निजावनुगतो तु निच प्रयुज्यत एव· यथासंयाम पितुमा
वद्ध इति॥ प्रपीयेति पीड·। प्रपीयेत्ययं शब्दः पीडः पीडः पान इत्येतस्य पिवतेर्नेस्यात्। अत्र प्रतिषेधात्। प्रपाय्येति भवितव्यम्॥ दूरयनीति वह
लग्रहणात्॥ दूरयत्यवनतेर्विवस्वति। अत्र दूरयतीति कथम्। नाविष्ठवद्भावः। स्थूलदूर इत्यादिना गुणलोपयोः कृतयोऽदवयतीति भवितव्य
म्· आह· वहुलग्रहणात्। प्रातिपदिकाद्धात्वर्थे वहुलमिष्ठवच्चेति। अत्र वहुलग्रहणात्। स्थूलदूरादिसूत्रेण यद्विहितं तन्न भवति॥ गकु
तीप्रभृतिषु निषेध्यो नुम्॥ हरतिचवनूपराजिकुर्वतीत्यादिषु शब्देषु शयस्य नोर्नित्युमिति नुमनिषेध्यानिषेद्धुमशक्यः॥ मित्रे राजो ल्लेति पुम्प
द्भावात्॥ मित्रे राजो न्नेति कथम्। गोन्नेति भवितव्यम्। इकोऽचि विभक्ताविति नुमो विधानात्। आह· तृतीयादिषु भाषितपुम्वदिति· वेत्स्य
सीति पदभङ्गात्॥ पतितो वेत्स्यसि क्षितौ॥ इत्यत्र वेत्स्यसीति नृसिध्यति· इत्युक्ते· आह· पदभङ्गादिति। वेत्स्यसीति पदं भज्यते· वेत्सि·
असीत्ययं निपातो न नु मित्यस्मिन्नर्थे क्वचिद्वाक्यालङ्कारे प्रयुज्यते। यथा पार्थिवेन्द्र मतिशल्यमस्थाइति॥ कामयानशब्दः सिद्धोऽनादिष्टे राम॰
ति॥ कामयानशब्दः सिद्धः। अनित्यागमशासनमिति। स्वार्थिका न कृतो षघरादिस्यात्॥ सोऽल्पदर्शोर्हृदशब्दावनिरूढत्वात्॥ सुहृद दुर्हृदश २५

हृदयस्य हृद्भावः आदिवृद्धौ सौहृददौर्हृदशब्दौ हृग्भ्यां युवादित्वादनि कृते हृद्भगसिन्ध्वन्त इति। हृदन्तस्य तद्धिते ऽणि
हृग्भ्यां युवादित्वादनि कृते हृदयस्य हृद्भावः। रमेरनुदात्तोपदेशत्वान्नोदात्तोपदेशस्येत्यादिना वृद्धिप्र
उभयपदवृद्धौ प्राप्तायां सौहार्ददौहार्दसौभाग्यमिति भवति॥ विरम इति निपातनात्॥ उपर्यादि षु सामीप्ये द्विरुक्ते षु द्वितीया॥ उपर्यादि
तिषेधस्याभावे विरम इत्याह निपातनात्। निपातनं यमु उप रमु इत्यत्रोपरम इति॥ उपर्यादि षु सामीप्ये द्विरुक्ते षु द्वितीया। वीप्सायां तु द्विरुक्ते षु षष्ठी भवति
षु सर्वेषु सामीप्ये द्विरुक्ते षु। उपर्युपरि सः सामीराइत्यनेन। उपर्यादिषु द्वितीयाम्रेडितान्तेष्विति द्वितीया। वीप्सायां तु द्विरुक्ते षु षष्ठी भवति
ति। उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति॥ मन्दं मन्दमिति प्रकारार्थत्वे॥ मन्दंमन्दनुदतिपवन इति। अत्र प्रकारार्थे मन्दंमन्दमिति भवति
प्रकारार्थत्वे तु प्रकारे गुणवचनस्येति द्विर्वचने कृते कर्मधारयभावे मन्दंमन्दमिति प्रयोगः। मन्दंमन्दमित्यत्र तु नित्यवीप्सयोरिति
द्विर्वचनम्। अनेकभागार्थकस्य हिमन्दे यदा सर्वभागमन्दत्वेन व्याप्तुमिच्छा भवति॥ न निद्रागिति मयभावप्राप्तेः। निद्रा कुड्यात् द्रवेय च
द्विर्वचनम्। अनेकभागार्थकस्य हिमन्दे यदा सर्वभागमन्दत्वेन व्याप्तुमिष्टा भवति॥ नाङ्गुलिसङ्ग इति मयडभावप्राप्तेः। अनुप्रासप्रियैस्त्वयमपभ्रंशः कृतः। निष्पा
विरूपरिमुहुर्वर्विशो वारि वाह इत्यत्र निद्रादुगिति न युक्तः। एकाचो बुद्धो भवितीति मयभावप्राप्तेः। अनुप्रासप्रियैस्त्वयमपभ्रंशः कृतः। निष्पा
घ इति पत्वं चिन्त्यम्॥ निष्पाघ इत्यत्र षत्वं चिन्त्यम्। न त्वत्र लक्षणमस्ति। कुस्कादिपाठो व्यसन निखितः। नाङ्गुलिसङ्ग इति मयड्विधेः। तेनावन्तिसेनादयः प्र
म्लायन्त्यङ्गुलिसङ्गेऽपि कोमलाः कुसुमस्रजः। अत्राङ्गुलिषङ्ग इति युज्यते। समासेऽङ्गुलेः षङ्ग इति मयड्विधेः। तेनावन्तिसेनादयः प्र
त्युक्ताः। तेनाङ्गुलिसङ्ग इत्यनेन अवन्तिसेन इन्द्रसेन इत्यादयः प्रत्युक्ताः। सुषमादिषु चेति संज्ञायामगात् इति मयड्विधानात्। नेन्द्रवा
हनादिशब्दे त्वनाहितस्याविवक्षितत्वात्। इन्द्रवाहनशब्दे वाहनमाहिताद्दिति णत्वं न भवति। आहितत्वाविवक्षितत्वात्। स्वस्वामिभाव
मात्रमत्र विवक्षितम्। तेनास्ति इन्द्रवाहनमिति। सदसन्तो मेयाशब्दो विविच्यान्ये निदर्शिताः। अनयैव दिशा कार्यशेषाणां च विवेच

२६

नमः ॥ इति काव्यालङ्कारवृत्तौ प्रायोगिके पञ्चमेऽधिकरणे द्वितीयोऽध्यायः। श्रीमदाचार्यवामनविरचिता काव्यालङ्कारसूत्रवृत्तिः समाप्ता॥ ॥संवत् १८४६ मीती चैत्र शुक्लपक्षे तृतीया २

८५

११५०

राम०
२६